नं० ४८६९

....

नाम - पञ्चाक्षरी मुक्तावली

कर्त्ता - सिद्धेश्वरः

Serial No. ....

पत्र संख्या - ५२ पत्राणि सं० २७८९

विषयः - तन्त्रम्

Extent ....

Description—

पंचाक्षर मुक्तावली

४०६९

51

ग्रं ५१

शिवपञ्चावरि

पद्धति।

शि॰ प॰
१

॥ श्रीगणेशाय नमः ॥ ॥ सरस्वत्यै नमः ॥ सांबसदाशिवाय नमः ॥ प्रणम्य जगतामीशं वि-
भुं सांबसदाशिवं ॥ गणेशं विघ्नहर्त्तारं गिरं विद्याकरान् गुरून् ॥ १ ॥ शिवपंचाक्षरीमंत्रजप-
होमार्चनात्मिकां ॥ पद्धतिं तनुते शैवविद्वान् सिद्धेश्वराह्वयः ॥ २ ॥ बुद्धिजालैः समाहृत्य
शैवागमसमुद्रतः ॥ सारोक्तिमौक्तिकानीह स्रगिव ग्रथितायतः ॥ ३ ॥ अतः पंचाक्षरीमुक्तो-
वलिरित्यभिधानकं ॥ अन्नते पद्धतिरियं शिवसंतोषकारिणी ॥ ४ ॥ आदिसर्गे महादेवो
जगन्निर्माणहेतवे ॥ मंत्रराजमिमं प्राह ब्रह्मणे रजआत्मने ॥ ५ ॥ पंचाक्षराणि पंचास्ये-
रग्रहीत् पद्मजो यतः ॥ पंचानामक्षराणां च समाहारोत्र कथ्यते ॥ ६ ॥ तान्यक्षराणि शैवा-
नि मंत्रस्तन्मय उच्यते ॥ वाच्यः सदाशिवश्चात्र वाचको मंत्र ईरितः ॥ ७ ॥ श्रुतिस्मृतिपुराणेषु

१

तथान्यैर्वागमेष्वपि॥ अस्यमंत्रस्यमाहात्म्यंपौनःपुण्येनवर्ण्यते॥ ८॥ ग्रंथविस्तारभीते
र्नेहकार्त्स्न्येनकथ्यते॥ मंत्रस्यभेदाबहवोनालंवक्तुंचतुर्मुखः॥ ९॥ यथामतियथाशास्त्रं
शिष्टाचारादिरोधतः॥ मंत्रस्यास्यत्रयोभेदाःसविस्तारंप्रकाश्यते॥ १०॥ प्रातःकर्त्तव्यतामंत्र
स्नानसंध्यादिकंक्रमात्॥ भूतशुध्यादिसमस्तानिन्यासजालानिविस्तरात्॥ ११॥ ध्यानंजपा
र्चनेहोमंतर्पणंमार्जनंतथा॥ नित्येनैमित्तिकेकाम्येकथयामियथोचितं॥ १२॥ यदिप्रमादा
त्स्खलनंजायतेयत्रकुत्रचित्॥ क्षंतुमर्हतितत्संतोगुणलुब्धाहिसाधवः॥ १३॥ अथादौ
शमदमादिसंपत्तिमान्विवेकलक्षितस्यमोक्षाद्यामुष्मिककामोवापुत्राद्यैहिकका
मोवाधिकारी॥ साक्षात्कृतमंत्रदेवतास्वरूपगुरुमभिगम्यतमनुरूपधनजनादिनाप्रसा

ब्धतदनुज्ञया त्वाशरीरशुध्यर्थं प्रायश्चित्तं विधाय निर्मलो भूत्वा दीक्षाविधानोक्तरीत्या गु
रुसकाशान्मंत्रोपदेशं गृहीत्वा तदुपयोगिकमंत्रानुष्ठानविधिं गुरुमुखादेव विज्ञाय यथो
क्तदेशकालाविरोधेन मंत्राभिमुख्यार्थं मंत्रस्य पुरश्चरणं विधाय नित्यनैमित्तिकका
म्यानुष्ठानानि कुर्यात्तत्रायं विधिः ॥ अथादौ ब्राह्मे मुहूर्ते समुत्थाय श्रीगुरुपादौ स्मृ
त्वा प्रधानमूर्त्तिं सदाशिवं मनसा ध्यात्वा तदनुज्ञया नित्यकर्मानुष्ठानं कुर्यात् ॥ प्रातः शौ
चादिकं स्मृत्युक्तमार्गेण निर्वर्त्य निषिद्धदंतकाष्ठैर्मूलबीजस्मरणपूर्वकं दंतानां शोधना
वस्य मुखं प्रक्षाल्य नित्यस्नानं विधाय मंत्रस्नानं कुर्यात् ॥ मूलेनाचम्य प्राणानायम्य श्री
सदाशिवपरिचर्यायोग्यतासिद्धये मंत्रस्नानं करिष्य इति संकल्प्य मूलमंत्रस्य ऋष्यादि

कं स्मरेत्॥ अस्य श्री शिवपंचाक्षरी मंत्रस्य वामदेव ऋषिः पंक्तिछंदः॥ श्री सदाशिवो देव
ता॥ उमिति बीजं उमिति शक्तिः ममिति कीलकं मंत्रस्नाने विनियोगः॥ ॐ अंगुष्ठाभ्यां नम
॥ नं तर्जनीभ्यां नमः॥ मों मध्यमाभ्यां नमः॥ शिं अनामिकाभ्यां नमः॥ वां कनिष्ठिकाभ्यां नम
॥ यं करतलकरपृष्ठाभ्यां नमः॥ एवमेव षडंगन्यासं कुर्यात्॥ क्रोमित्यंकुशमुद्रया सवितृमं
डलात्तीर्थमाकृष्य वमिति अमृतीकृत्य सजले षट्कोणं चक्रं विचिंत्य मध्ये मूलं कोणेषु षडंगानि वि
न्यस्य तत्र सदाशिवं ध्यात्वा मनसाभ्यर्च्य जलदेवतात्मैक्यं विभाव्य आवाहनादिमुद्राः प्रदर्श्य मू
लेन द्वादशवारं कलशमुद्रया स्नायात्॥ मूलमंत्रपूर्वकं सोहं हंस इति निमज्योन्मज्य एवमु
पसंहृत्य शुद्धे वाससी परिधायाचम्य त्रिपुंड्रधारणं कुर्यात्॥ यथोक्तविधिना कृतं स्नानमश्रौ

ताग्निहोत्रजं भस्म वा सद्योजातादिपंचब्रह्ममंत्रैः परिमृज्य अग्निरितिमूलमंत्रेणाप्यग्निम
अमानस्तोक इति समुद्धृत्य मूलषड्वीजैः शिरोललाटवक्षस्कंधेषु तिर्यक्तिस्रोरेखाः कृ
त्वा मूलेन सर्वांगमुद्धूलयेत्। अथ यथोक्तकृतसंस्कारान् रुद्राक्षान् प्रत्यंगं धारयेत्। शि
खायामेकं। शिरसि समंताच्चत्वारिंशत्। कर्णयोः षट् षट्। गले द्वात्रिंशत्। बाह्वोः षोडश षो
डश करयोर्द्वादश द्वादश। वक्षस्यष्टोत्तरशतं। अथ वा सहस्रं धृत्वा नित्यसंध्यां ते मंत्रसंध्या
मारभेत्। यथा। तत्त्वत्रयेण मूलेन वा चम्य प्राणानायम्य। श्रीसदाशिवप्रीत्यर्थं मंत्रसंध्यां
करिष्य इति संकल्प्य स्नानवत्कलशशुद्धिं विनाप्य। वामहस्ते जलं गृहीत्वा करगलितोदकेर्मू
लेन द्वादशमार्जनानि कृत्वा शेषं जलं नासाग्रमानीय वामनाड्यांतः प्रविष्टं ध्यात्वा तेनां

तः पापं क्षालितं स्मृत्वा दक्षिणनाड्या बहिर्गतं तत् कलुषं जलं वामकरेण पुरः कल्पितव
ज्रशिलायामास्फालयेत्॥ ततो मूलेन दत्वा वारमभिमंत्र्य जलं पीत्वा प्राणायामपूर्वकं त
त्पुरुषाय विद्महे इति गायत्र्या सूर्यमंडलवर्त्तिने सदाशिवाय इदमर्घ्यं नमः इत्यर्घ्यत्रयं
दत्वा सोहमस्मीत्यात्मानमुपसंहृत्य आचम्य प्राणानायम्य तत्पुरुषाय विद्महे इति सहस्र
मष्टोत्तरशतं वा यथाशक्ति जपित्वा ईशान इत्युपस्थानं कुर्यात्॥ ततो मूलेन वा तत्पु
रुषाय विद्महे इत्यनेन वा यथाशक्ति तर्पणं कुर्यात्॥ इति पंचाक्षरीमुक्तावल्यां प्रथ
मश्रेः॥ ॥ अथ देवतागारमागत्य पादौ प्रक्षाल्याचम्य॥ गं गणपतये नमः॥ द्वारश्रियै न
मः इत्यूर्ध्वदेहल्यां॥ वास्तुपुरुषाय नमः इत्यधोदेहल्यां॥ धात्रे नमः॥ विधात्रे नमः इति द्वादे

रपार्श्वयोः॥ रत्नमंडपायनमः इतिमंडपंप्रणम्यदक्षिणपादपुरःसरमंतःप्रविश्यतत्र
कूर्मचक्रंविचिंत्यकूर्मस्यमुखस्थानेचित्रकंबलाद्यासनंपरिकल्प्यतत्रतिष्ठन्भूमिंप्रार्थ
येत्॥ पृथिव्यामेरुपृष्ठऋषिः कूर्मोदेवतासुतलंछंदः॥ आसनेविनियोगः॥ पृथ्वित्वया
धृतालोकादेवित्वंविष्णुनाधृता॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं॥ आधारशक्त्यैनमः
मंडूकायनमः॥ कूर्मायनमः॥ वराहायनमः॥ पृथिव्यैनमः॥ अनंतायनमः॥ आत्मासनाय
मः॥ योगासनायनमः॥ कूर्मासनायनमः॥ सुखासनायनमः॥ इत्यासनदेवताःसंपूज्यपदर्ला
नुपुष्पाणिवादत्वातत्रोपविश्यदिव्यदृष्ट्यावलोकनेनदिव्यान्॥ ऋअस्त्रायफट्एलदमि
मंत्रितजलोत्क्षेपणेनांतरिक्षान्॥ वामपादस्यत्रिःपार्ष्णिघातेनभौमान्विघ्नान्उत्सार्य॥ अ

पसर्पन्तु येभूता येभूता विघ्नसंस्थिताः। येभूता विघ्नकर्त्तारस्तेनश्यंतु शिवाज्ञया। अपक्रा
मंतु भूतानि पिशाचाः सर्वतो दिशं। सर्वेषामविरोधेन ब्रह्मकर्मसमारभेत्। इति जप्त्वाक्रूअ
स्त्राय फट् नमः इति करशुद्धिं कृत्वा तेनैवोर्ध्वेर्ध्वं तालत्रयं विधाय नाराचमुद्रयाग्निप्रा
कारं त्रिशूलमुद्रया परितो रक्षां विधाय। मूर्ध्नि गुरुभ्यो नमः। परमगुरुभ्यो नमः। पराप
रगुरुभ्यो नमः। परमेष्ठीगुरुभ्यो नमः। दक्षिणभुजे गणपतये नमः। वामभुजे दुर्गायै न
मः। क्षेत्रपालाय नमः। दक्षिणजानुनि। सरस्वत्यै नमः। वामजानुनि। हृदि आत्मने नमः इति न
त्वा गायत्र्या प्राणानायम्य देशकालौ संकीर्त्य श्रीसदाशिवप्रीत्यर्थं अमुककामना सिध्यर्थं पंचा
क्षरीमंत्रोपासनांक रिष्यमाणस्तद्योग्यतासिद्ध्यै तदंगभूतशुद्धिप्राणप्रतिष्ठादिकं क।

रिष्य इति संकल्पयेत्॥ ॥आदौ मूलाधारादुत्थितां प्राणशक्तिं हंसः सोहमिति मंत्रेण सु
षुम्णामार्गेण ब्रह्मरंध्रं नीत्वा तत्र परमात्मनि संयोज्य स्थूलदेहोपसंहारं भावयेत्॥ पादा
दिजानुपर्यंतं पृथिवीस्थानं चतुरस्रं पीतवर्णं वज्रलांछितं लं जले प्रविलापयामि।
जान्वादिनाभिपर्यंतं मपांस्थानमर्द्धचंद्राकारं शुक्लवर्णं पद्मलांछितं वं तेजसि प्रविला
पयामि। नाभ्यादिकंठपर्यंतमग्निस्थानं त्रिकोणं रक्तवर्णं स्वस्तिकलांछितं रं वायौ प्रविला
पयामि। कंठादिभ्रूमध्यपर्यंतं वायुस्थानं षट्कोणं षड्बीजलांछितं यं आकाशे उपसंह
रामि। भ्रूमध्यादिब्रह्मरंध्रपर्यंतमाकाशस्थानं वृत्तं धूम्रवर्णं ध्वजलांछितं हं अहंकारे
उपसंहरामि। अहंकारं महत्तत्वे उपसंहरामि। महत्तत्वं प्रकृतौ उपसंहरामि। प्रकृतिं सदा

शिवात्मकपरब्रह्मणि उपसंहृत्य सूक्ष्मशरीरोपसंहारं भावयेत्॥ ब्रह्महत्याशिरस्कं

च स्वर्णस्तेयभुजद्वयं॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं॥ तत्संयोगिपदद्वंद्व मंगप्र

त्यंगपातकं॥ उपपातकरोमाणं रक्तश्मश्रुविलोचनं॥ खड्गचर्मधरं पापमंगुष्ठपरि

माणकं॥ अधोमुखं कृष्णवर्णं दक्षकुक्षौ विचिंतयेत्॥ यमिति वायुबीजं पूरके १६ स्मृत्वा॥ तं

पापपुरुषं शोषितं ध्यात्वा॥ रमित्यग्निबीजं कुंभके ६४ स्मृत्वा तं दग्धं विचिंत्य॥ यमिति

वायुबीजं ३२ स्मृत्वा रेचकेन बहिर्गतं भावयेत्॥ वमित्यमृतबीजं स्मृत्वामृतधाराजी

वनीं विचिंत्य लमिति पृथ्वीबीजेनाधारे देहपिंडं संभाव्य हमित्याकाशबीजेन हृदये देहा

वयवान् विचिंत्य स्वजीवकलां सोहं हंस इति मंत्रेण स्वदेहे प्रविष्टां ध्यात्वा श्रीसदाशि

पं॰
६

स्वरूपाद्ब्रह्मणः प्रकृतिः प्रकृतेर्महान् महतो हंकारः अहंकारादाकाशः आकाशाद्वायुः
वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योन्नं अन्नाद्रेतः रेतस
ः पुरुष इति क्रमेण संभाव्य श्रीसदाशिवस्वरूपो हमिति भावयेत्॥ इति भूतशुद्धिः॥॥
अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छंदांसि भगव
ती प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं प्राणप्रतिष्ठापने विनियोगः॥ ॐ अं
कं खं गं घं ङं पृथिव्यप्तेजो वाय्वाकाशात्मने आं अं गुष्ठाभ्यां नमः॥ ॐ इं चं छं जं झं ञं शब्दस्प
र्शरूपरसगंधात्मने ईं तर्जनीभ्यां नमः॥ ॐ उं टं ठं डं ढं णं त्वक्चक्षुःश्रोत्रजिह्वाघ्राणात्मने ऊं
मध्यमाभ्यां नमः॥ ॐ एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः॥ ॐ

६

ॐ पं फं बं भं मं वचनादानविहारगतिविसर्गानंदात्मने ॐ कनिष्ठिकाभ्यां नमः। ॐ
यं रं लं वं शं षं सं हं लं क्षं मनोबुध्यहंकारचित्तात्मने ॐः करतलकरपृष्ठाभ्यां नमः। ए
वं षडंगन्यासः॥ ध्यानं॥ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा त्रिनेत्रा पाशं को
दंडमिक्षूद्भवमथ चगुणानंकुशं पंचबाणान्। बिभ्राणासृक्कपालं त्रिनयनललिता पीन
वक्षोरुहाढ्या। देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥ ॐ आं ह्रीं क्रों यं रं लं वं
शं षं सं हं हंसः सोहं मम प्राणा इह प्राणा मूलं पुनः मम जीव इह स्थितः मूलं पुनः। मम सर्वे
न्द्रियाणि। इह स्थितानि मूलं पुनः॥ मम वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्तये सु
खं चिरं तिष्ठंतु स्वाहा इति त्रिवारं हृदये करं दत्वा जपेत्। प्रणवस्य षोडशावृत्तीः कृत्वा षो

पं॰
७

इत्थं संस्कारान् भावयेत्॥ इति प्राणप्रतिष्ठा॥॥ अथ मातृकान्यासः॥॥ अस्य श्रीअंतर्मा
तृकामंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः मातृका सरस्वती देवता हलो बीजानि स्वराः शक्त
यः बिंदवः कीलकानि अंतर्मातृकान्यासे विनियोगः॥ ॐ अं कं ५ आं अंगुष्ठाभ्यां नमः॥ ॐ इं चं
५ तर्जनीभ्यां नमः॥ ॐ उं टं ५ ऊं मध्यमाभ्यां नमः॥ ॐ एं तं ५ ऐं अनामिकाभ्यां नमः॥ ॐ ओं पं ५ औं
कनिष्ठिकाभ्यां नमः॥ ॐ अं यं १० अः करतलकरपृष्ठाभ्यां नमः॥ एवं षडंगन्यासः॥ ध्यानं॥ व
र्णैरर्णवषट्दलार्यमकलाचक्षुर्विभक्तैः क्रमादाद्यैः सादिभिराहृतानूर्ध्वदृयुतैः षड्चक्र
मध्यादिमान्॥ डाकिन्यादिभिराश्रितान् परिचितान् ब्रह्मादिभिर्दैवतैर्निदानां परदेवतावि
दधतां चित्ते विधत्तां मुदं॥ आदौ कंठपद्मे षोडशदले अकारादीन् स्वरान् क्रमेण न्यसेत् ॥ अं

७

नमइत्यादि। हृत्पद्मे द्वादशदले कादिठांतान्न्यसेत्। कं नमइत्या। नाभिपद्मे दशदले डादिफांतान्न्यसेत्। डं नमइत्यादि। स्वाधिष्ठाने षट्दले पद्मे वादिलांतान् बं नमइत्यादि न्यसेत्। आधारे चतुर्दले वादिसांतान्न्यसेत्। वं नमाइत्यादि। भ्रूमध्ये द्विदलपद्मे हंक्षं न्यसेत्। इत्यंतर्मातृका॥ ॥अथ बहिर्मातृकान्यासः॥ ऋष्यादिन्यासादिकं पूर्ववत्। ध्यानं। पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां। अक्षस्रक्कुंभचिंतालिखितवरकरां त्र्यक्षणां पद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि। श॥ ॐ अं नमः शिरसि। आं मुखे। इं ईं नेत्रयोः। उं ऊं कर्णयोः॥ ऋं ॠं नासापुटयोः। लृं लॄं कपोलयोः। एं ऐं दंतपंक्त्योः। ओं औं उष्ठयो

ः। अं जिह्वामूले। अः कंठे। कं दक्षबाहुमूले। खं दक्षकूर्परे। गं दक्षमणिबंधे। घं दक्षांगुलि
मूले। ङं दक्षांगुल्यग्रे। चं वामबाहुमूले। छं वामबाहुकूर्परे। जं वाममणिबंधे। झं वामांगुलि
मूले। ञं वामांगुल्यग्रे। टं कक्षोरुमूले। वं दक्षजानुनि। डं दक्षगुल्फे। ढं दक्षांगुलिमूले। णं दक्षां
गुल्यग्रे। तं वामोरुमूले। थं वामजानुनि। दं वामगुल्फे। धं वामांगुलिमूले। नं वामांगुल्यग्रे
पं फं कुक्षिद्वये। बं पृष्ठे। भं नाभौ। मं उदरे। यं त्वगात्म हृदये। रं रक्तात्म कंठे। लं वं बाहुमू
लयोः। शं षं हृदादिकराग्रयोः। सं हं हृदादिपादाग्रयोः। लं पादादिशिरः पर्यंतं। क्षं
शिरआदिपादाग्रं। इति बहिर्मातृकान्यासः॥ ॥अथ निवृत्त्यादिकलामातृकान्यासः। अ
स्यश्रीनिवृत्त्यादिकलामंत्रस्य प्रजापतिऋषिः। गायत्रीछंदः। कलासरस्वतीदेवताक

ला न्यासे विनियोगः। न्यासः पूर्ववत्। ध्यानं। हस्तैः पद्मं रथांगं गुणमथ हरिणं पुस्तकं व
र्णमालां टंकं शूलं कपालं वरममृतलसद्धेमकुंभं वहंती। मुक्ताविद्रुमस्वर्णसुधादस्फुटिकनय
जपाबंधुरैः पंचवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि। वह्निर्मा
तृकोक्तस्थानेषु न्यसेत्। अं श्रं निवृत्त्यै नमः। आं प्रतिष्ठायै। इं विद्यायै। ईं शांत्यै। उं इंधिकायै
ऊं दीपिकायै। ऋं रेचकायै। ॠं मोचकायै। लृं परायै। लॄं सूक्ष्मायै। एं सूक्ष्मामृतायै। ऐं ज्ञानामृ
तायै। ओं आप्यायिन्यै। औं व्यापिन्यै। अं व्योमरूपायै। अः अनंतायै। कं सृष्ट्यै। खं ऋद्ध्यै। गं स्मृ
त्यै। घं मेधायै। ङं कांत्यै। चं लक्ष्म्यै। छं द्युत्यै। जं स्थिरायै। झं स्थित्यै। ञं सिद्ध्यै। टं जरायै। ठं पालिन्यै
डं शांत्यै। ढं ऐश्वर्यै। णं रत्यै। तं कामिन्यै। थं वरदायै। दं आह्लादिन्यै। धं प्रीत्यै। नं दीर्घायै। पं

पं. १९

तीक्ष्णायै। फंरौद्रायै। बंभयायै। भंनिद्रायै। मंतंद्र्यै। यंक्षुधायै। रंक्रोधिन्यै। लंक्रियायै वंउत्का
र्यै शंमृत्यवे। षंपीतायै। संश्वेतायै हंअरुणायै लंअसितायै। क्षंअनंतायै। इतिकलान्यासः॥ अ
थश्रीकंठमातृकान्यासः॥ अस्य श्रीकंठमातृकामंत्रस्य दक्षिणामूर्त्तिरृषिः जगतीछंदः अर्द्धना
रीनटेश्वरो देवता हलो बीजानि स्वराः शक्तयः॥ श्रीकंठादिमातृकान्यासे विनियोगः॥ ॐ ऐं ह्रीं
श्रीं अंकं। खंआं अंगुष्ठाभ्यां नमः॥ ॐ ऐं ह्रीं श्रीं इंचं ईं तर्जनीभ्यां नमः॥ ॐ ऐं ह्रीं श्रीं उंटं पऊं मध्यमा
भ्यां नमः॥ ॐ ऐं ह्रीं श्रीं एं तं पऐं अनामिकाभ्यां नमः॥ ॐ ऐं ह्रीं श्रीं ओं पं प-औं कनिष्ठिकाभ्यां नमः॥
ॐ ऐं ह्रीं श्रीं अं यं०अः करतलकरपृष्ठाभ्यां नमः॥ एवमेव षडंगन्यासः॥ ध्यानं॥ सिंदूरकांचनस
मोभयभागमर्द्धनारीश्वरं गिरिसुताहरभूषचिह्नं पाशाभयाक्षवलयेष्टदहस्तमीशांस्मृत्वाभ्य

१९

सेतत्सकलवांछितवस्तुसिद्ध्ये ॥ ॐ रों ज्ञां श्रीं स्वं आं कं शूर्पोदरीभ्यां नमः शिरसि ॥ सर्वत्र ॐ
कारबीजत्रयपूर्वकं बहिर्मातृकास्थानेषु न्यसेत् ॥ अं श्रनंतेशविरजाभ्यां नमः ॥ इं सूक्ष्मेश
शाल्मलीभ्यां ॥ ईं त्रिमूर्तेशलोलाक्षीभ्यां ॥ उं अमरेशावर्तुलाक्षीभ्यां ॥ ऊं अर्घ्वेशदीर्घघो
णाभ्यां ॥ ऋं भारभूतेशदीर्घमुखीभ्यां ॥ ॠं तिथीशगोमुखीभ्यां ॥ लृं स्थाण्वीशदीर्घजि
ह्वाभ्यां ॥ ॡं हरेशकुंडोदरीभ्यां ॥ एं झिंटीशऊर्ध्वकेशीभ्यां ॥ ऐं भौतिकेशविकृतमु
खीभ्यां ॥ ओं सद्योजातेशज्वालामुखीभ्यां ॥ औं अनुग्रहेशउल्कामुखीभ्यां ॥ अं अक्रूरेशश्री
मुखीभ्यां ॥ अः महासेनेशविद्यामुखीभ्यां ॥ कं क्रोधीशमहाकालीभ्यां ॥ खं चंडीशसरस्व
तीभ्यां ॥ गं पंचांतकेशसर्वसिद्धिगौरीभ्यां ॥ घं शिवोत्तमेशत्रैलोक्यविद्याभ्यां ॥ ङं एकरुद्रेश

पं.
१०

मंत्रशक्तिभ्यां। चं कूर्मेशआत्मशक्तीभ्यां। छं एकनेत्रेशचतुराननेशलं
बोदरीभ्यां। जं चतुराननेशाद्राविणीभ्यां। झं सर्वेशनागरीभ्यां। टं सोमेशखेचरीभ्यां। ठं लांगली
शमंजरीभ्यां। डं दारुकेशरूपिणीभ्यां। ढं अर्द्धनारीशवीरणीभ्यां। णं उमाकान्तेशकोटरी
भ्यां। तं आषाढीशपूतनाभ्यां। थं दंडीशभद्रकालीभ्यां। दं अत्रीशयोगिनीभ्यां। धं मी
नेशशंखिनीभ्यां। नं मेषेशगर्जनीभ्यां। पं लोहितेशकालरात्रीभ्यां। फं शिखीशकुब्जि
नीभ्यां। बं छगलंडेशकपर्दिनीभ्यां। भं द्विरंडेशवज्रिणीभ्यां। मं महाकालेशविजयाभ्यां
यं त्वगात्मभ्यां वालीशसुमुखीश्वरीभ्यां। रं असृगात्मभ्यां भुजगेशरेवतीभ्यां। लं मांसात्म
पिनाकीशमाधवीभ्यां। वं मेदात्मभ्यां खड्गीशवारुणीभ्यां। शं अस्थ्यात्मभ्यां बकेशवाय

१०

वीम्नां। षंमज्जात्मम्नां श्वेतेशार ज्ञीवदारिणीम्नां। संशुक्रात्मम्नां न्तृग्वीशासहजाम्नां।
हंप्राणात्मलकुलीशालक्ष्मीम्नां। लंजीवात्मम्नां स्विवेशायव्यापिनीम्नां। क्षंक्रोधा
संवर्त्तकेशामहामहपाम्नां। इतिश्रीकंगादिमातृकान्यासः॥ अथपीठन्यासः॥ मूर्ध्निद
क्षिणेगुरुभ्योनमः॥ वामेगणपतयेनमः॥ अधःआधारशक्तये मूलप्रकृतये॥ काला
ग्निरुद्राय॥ महामंडूकाय॥ आदिकूर्माय॥ वराहाय॥ अनंताय॥ पृथिव्यै॥ अमृतार्ण
वाय॥ रत्नद्वीपाय॥ हेमगिरयेनंदनोद्यायेनो॥ कल्पवृक्षाय॥ मणिभूतलाय॥ रत्नमं
डपाय॥ रत्नसिंहासनाय॥ इत्याधारादिहृदयपर्यंतमुपर्युपरिन्यसेत्॥ धर्मायदक्षां
समूले॥ ज्ञानायदक्षांसे॥ वैराग्यायवामांसे ऐश्वर्यायवामोरुमूले॥ अधर्मायमानो

पं.
२२

ॐ ज्ञानाय दक्षिणपार्श्वे। ॐ वैराग्याय मुखे। ॐ ऐश्वर्याय वामपार्श्वे मध्ये संसता
य। रं रजसे। तं तमसे। मं मायायै। विं विद्यायै। कं कंदाय। नं नालाय। पं पद्माय। दं द
लेभ्यो। कं केसरेभ्यो। कं कर्णिकायै। अं अर्कमंडलाय। उं सोममंडलाय। मं वह्निमंड
लाय। अं आत्मने। उं अंतरात्मने। मं परमात्मने। ॐ ज्ञानात्मने। अथ प्रागादि। वामायै
ज्येष्ठायै। रौद्र्यै। काल्यै। कलविकरिण्यै। बलविकरिण्यै। बलप्रमथिन्यै। सर्वभूतद
मिन्यै। मध्ये मनोन्मन्यै ॐ नमो भगवते सकलगुणात्मशक्तियुक्तानंतयोगपीठात्म
ने नमः। इति सर्वांगेषु व्यापकं। इति पीठन्यासः। अथ प्रधानन्यासः॥ मूलेन प्राण
नायम्य ऋष्यादिन्यासान् कुर्यात्। अस्य श्रीशिवपंचाक्षरीमंत्रस्य वामदेव ऋषिः।

२२

शिरसि। पंक्तिश्छंदः मुखे। श्रीसदाशिवोदेवता हृदये। उं बीजं नाभौ। ॐ शक्तिः गुह्ये। मं कीलकं संधिषु। शक्तिपंचाक्षरीप्रासाद पंचाक्षर्योः ह्रीं शक्तिः अन्यत्सर्वं समानं। श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः। उंकारस्य ब्रह्मा ऋषिः देवीगायत्रीछंदः परमात्मा देवता शुद्धस्फटिकवर्णं सर्वव्याप्य स्थाने विनियोगः। नकारस्य गौतमऋषिः गायत्रीछंदः रुद्रोदेवता पीतवर्णं पूर्वमुखस्थाने विनियोगः। मकारस्य अत्रिः ऋषिरनुष्टुप्छंदः रुद्रोदेवता कृष्णवर्णं दक्षिणमुखस्थाने विनियोगः। शिकारस्य विश्वामित्र ऋषिः त्रिष्टुप्छंदः विष्णुर्देवता धूम्रवर्णः पश्चिममुखस्थाने विनियोगः। वकारस्यांगिरऋषिः बृहतीछंदः ब्रह्मादेवता हेमवर्णं उत्तरमुखस्थाने विनियोगः। यका

पं.
१२

रस्यमंत्रस्य ब्राह्मऋषिः विराट्छंदः स्कंदो देवता। श्वेतवर्णम् ॐ ई मुखस्थाने विनियोगः। अथ मू
लेन करशुद्धिं व्यापकं च विधाय करांगन्यासं कुर्यात्। ॐ ॐ अंगुष्ठाभ्यां नमः॥ ॐ नं तर्जनीभ्यां
नमः। ॐ मों मध्यमाभ्यां नमः। ॐ शिं अनामिकाभ्यां नमः। ॐ वां कनिष्ठिकाभ्यां नमः। ॐ यं कर
तलकरपृष्ठाभ्यां नमः। एवमेव षडंगेषु। इदं शुद्धपंचाक्षर्यां। शक्तिपंचाक्षरीप्रासादपंचाक्ष
र्योस्तु भेदः। ॐ ॐ ह्रां १ ॐ नं ह्रीं २ ॐ मों ह्रूं ३ ॐ शिं ह्रैं ४ ॐ वां ह्रौं ५ ॐ यं ह्रः ६। इति शक्तिपंचाक्षरी
षडंगन्यासः। ॐ ॐ ह्रौं १ ॐ नं ह्रौं २ ॐ मों ह्रौं ३ ॐ शिं ह्रौं ४ ॐ वां ह्रौं ५ ॐ यं ह्रौं ६ इति प्रासादपं
चाक्षरी षडंगन्यासः। अथ स्थितिन्यासः॥ ॐ ॐ हृदयाय। ॐ नं गुह्याय। ॐ मं पादाभ्यां। ॐ शिं
मूर्ध्नि। ॐ वां मुखाय। ॐ यं कंठाय। अथ सद्योजातादिन्यासः॥ तत्रादौ तर्जनादिन्यासः॥ ॐ नं

१२

तत्पुरुषाय तर्जनीभ्यां नमः ॥ ॐ मों अघोराय मध्यमाभ्यां नमः ॥ ॐ ह्रीं सद्योजाताय अना
मिकाभ्यां नमः ॥ ॐ वां वामदेवाय कनिष्ठिकाभ्यां नमः ॥ ॐ यं ईशानाय अंगुष्ठाभ्यां नमः
अथांगन्यासः ॥ ॐ नं तत्पुरुषाय मुखे ॥ ॐ मं अघोराय हृदये ॥ ॐ ह्रीं सद्योजाताय पादयोः
ॐ वां वामदेवाय गुह्ये ॥ ॐ यं ईशानाय मूर्ध्नि ॥ अथ पंचवक्त्रन्यासः ॥ ॥ ॐ नं तत्पुरुषाय
पूर्वमुखाय ॥ ॐ मं अघोराय दक्षिणमुखाय ॥ ॐ ह्रीं सद्योजाताय पश्चिममुखाय ॥ ॐ वां
वामदेवाय उत्तरमुखाय ॥ ॐ यं ईशानायोर्ध्वमुखाय ॥ शुद्धपंचाक्षर्यामेवं कर्त्तव्यं ॥ शाक्ति
पंचाक्षरीप्रासादपंचाक्षर्योस्तु तत्षडंगन्यासोक्तबीजपूर्वकं कर्त्तव्यं ॥ अथ सद्योजा
तादिकलान्यासः ॥ सद्योजातं प्रपद्यामि सिद्ध्यै सद्योजाताय वै नमो नमः ॥ धृत्यै ॥ भवेद्धसे दक्षस्तने

जा कनिष्ठांगुष्ठे दक्षपादे वामपादे

पं० २३ अंगुष्ठ अनामिका अंगुष्ठमध्यमा

ॐ नु वेलक्ष्म्यै ॥ नातिन्नवेमेधायै ॥ नवस्वमांप्रज्ञायै ॥ नवप्रज्ञवायै ॥ तत्पुरुषाय नमः सुधायै ॥ पादयोस्तनयोर्नासिकायां मूर्ध्नि वायुयुगे ॥ इत्यष्टौ सद्योजातकलाः कनिष्ठांगुष्ठयोगेन न्यसेत् ॥ वाँमदेवाय रजस्यै ॥ ज्येष्ठाय रक्षायै ॥ रुद्राय रत्यै ॥ कालाय पालिन्यै ॥ कलकामायै ॥ विकरणाय संयमिन्यै ॥ बलक्रियायै ॥ विकरणाय वृध्यै ॥ बलं स्थिरायै ॥ प्रमथनाय रात्र्यै ॥ सर्वभूतमनाय त्रामण्यै ॥ नमो मोहिन्यै ॥ मनोन्मनाय ज्वरायै ॥ गुह्य वृषणौ रुजानुजंघास्फिक्युग्मे कटिपार्श्वयोः ॥ एतास्त्रयोदश वामदेवकलाः अंगुष्ठानामिकायोगेन न्यसेत् ॥ अघोरेभ्यो तामस्यै हृदये ॥ अथ घोरेभ्यो मोहिन्यै कंठे ॥ घोरच्छायायै दक्षिणांसे ॥ घोरतरेभ्य निद्रायै वामांसे ॥ सर्वेभ्यो व्याधिन्यै नाभौ ॥ सर्व सर्वेभ्यो मृत्यवे

२३

अंगुष्ठतर्जनि

लिंगमुद्रा

जगरो नमस्ते अस्तु स्तुधायै पृष्टे ॥ रुद्ररूपेभ्यस्तृषायै उत्तरसि इत्यघोरस्याष्टौ कलान्त्वं
गुष्ठमध्यमायोगेनन्यसेत् ॥ ॐ तत्पुरुषाय विद्महे शांत्यै उत्तरमुखे । महादेवाय धीम
हि विद्यायै पश्चिममुखे । तन्नो रुद्रः प्रतिष्ठायै दक्षिणमुखे । प्रचोदयात् निवृत्त्यै पूर्व
मुखे ॥ तत्पुरुषस्य चतस्रः कला अंगुष्ठतर्जनीयोगान्न्यसेत् ॥ ॐ ईशानः सर्वविद्यानां शशि
न्यै ऊर्ध्वमूर्ध्नि ॥ ईश्वरः सर्वभूतानां मंगदायै पूर्वमूर्ध्नि ॥ ब्रह्माधिपतिर्ब्रह्मणोधिप
तिर्ब्रह्मा इष्टायै दक्षिणमूर्ध्नि ॥ शिवो मे अस्तु मरीच्यै उत्तरमूर्ध्नि ॥ सदाशिवोंऽशुमा
लिन्यै पश्चिममूर्ध्नि । इतीशानकलाः समुद्यांगुष्ठतस्तासां न्यासः स्याल्लिंगमुद्रया
इत्यष्टत्रिंशत्कलान्यासः ॥ ॥ अथ शक्तिन्यासः ॥ ॐ ॐ सर्वज्ञशक्तिधाम्ने हृदयाय नम

मः ॥ ॐ नं तृप्तिशक्तिधाम्ने शिरसे स्वाहा ॥ ॐ मं अनादिबोधशक्तिधाम्ने शिखायै वषट्
ॐ त्रीं स्वतंत्रशक्तिधाम्ने कवचाय हुं ॥ ॐ वां अलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट् ॥ ॐ यं
अनंतशक्तिधाम्ने अस्त्राय फट् ॥ इति शुद्धपंचाङ्गयां ॥ शक्तिन्यासादपंचाङ्गयोरस्तु षडं
गोक्तस्वस्वबीजपूर्वकं कुर्यात् ॥ अथ गोलान्यासः ॥ ॐ ॐ हृदयाय नमः ॥ ॐ नं मुखाय
ॐ मं दक्षिणनासायै ॥ ॐ त्रीं वामनासायै ॐ वां दक्षिणोरवे । ॐ यं वामोरवे । १ । ॐ ॐ कंठमूलाय
ॐ नं नाभ्यै ॥ ॐ मं दक्षिणपार्श्वाय ॥ ॐ त्रीं वामपार्श्वाय ॥ ॐ वां पृष्ठाय ॥ ॐ यं हृदयाय ॥ २ ॥ ॐ ॐ मूर्ध्ने ॥ ॐ
नं आस्याय ॥ ॐ मं दक्षिणनेत्राय ॥ ॐ त्रीं वामनेत्राय ॥ ॐ वां दक्षिणघ्राणाय ॥ ॐ यं वामघ्राणाय
३ ॥ ॐ ॐ दक्षिणबाहुमूले ॥ ॐ नं दक्षिणकूर्पराय ॥ ॐ मं दक्षिणमणिबंधाय ॥ ॐ त्रीं दक्षिणां

गुलिसंधिभ्यः। ॐवांदक्षिणांगुलिमध्यसंधिभ्यः। ॐयंदक्षिणांगुल्यग्राय।४। एवंवामकरे ५
ॐॐदक्षोरुमूले। ॐनंदक्षिणजानुनि। ॐमंदक्षिणगुल्फे। ॐशिंदक्षिणपादांगुलिमूले। ॐवांद
क्षिणपादांगुलिसंधिषु। ॐयंदक्षपादांगुल्यग्रेषु।।६।। एवंवामपादे।७। ॐॐशिरसेनमः। ॐॐनं
वक्त्राय। ॐमंहृदयाय। ॐशिंजठराय। ॐवांऊरुभ्यां। यंॐपादाभ्यां।८। ॐॐहृदयाय। ॐनं
मुखाय। ॐमंदक्षभुजाय। ॐशिंवामभुजाय ॐवांदक्षिणबाहवे। ॐयंवामबाहवे।९। ॐॐ
खामुय। ॐनंअंसाभ्यां। ॐमंहृदयाय ॐशिंपादाभ्यां। ॐवांऊरुभ्यां। ॐयंकुक्षीभ्यां।१०। ए
वंदशाविधन्यासंकृत्वा। ॐॐमूर्ध्ने। ॐनंनालाय। ॐमंअधराय। ॐशिंदक्षांसाय। ॐवांवामां।
साय। ॐयंहृदये। इतिकुर्यात्। अनंतरंपादादिशिरःपर्यंतंशिरआदिपादपर्यंतं। करा

पं.
२५

स्मांत्रि वारं गोलकन्यासं कुर्यात्॥ एवं स्तुडे न्याक्ति प्रासादयोः। पूर्वोक्त बीजपूर्वकमे
वं कुर्यात्॥ अथ चक्र न्यासः॥ ॐ ॐ हृदयाय नमः। ॐ नं शिरसे स्वाहा। ॐ मों शिखायै
वषट्। ॐ शिं कवचाय हुं। ॐ वां नेत्रत्रयाय वौषट्। ॐ यं अस्त्राय फट्। ततो मूलमंत्रं स
मग्रं दत्त्वा दिक्षु प्रत्येकं विन्यस्य गणपति मातृका दुर्गा क्षेत्रपालानाग्नेयादि कोणेषु न्य
सेत्। ईशान इति मंत्रं शांत्यातीतायै नमः शिरसि। तत्पुरुषायेति मंत्रं शांत्यै नमः मुखे।
अघोरेभ्य इति मंत्रं विद्यायै नमः हृदि। वामदेवायेति मंत्रं प्रतिष्ठायै नमः गुह्ये। सद्योजा
तमिति मंत्रं निवृत्त्यै नमः पादयोः। अनंताय मुखे। सूक्ष्माय शिवोत्तमाय पार्श्वयोः
एकनेत्राय कंठे। एकरुद्राय त्रिमूर्तये अंसयोः। श्रीकंठाय शिखंडिने स्तनयोः। अं

२५

दिने ललाटे । महाकालाय वामांसे गणपतये वामपार्श्वे ऋषभाय नाम्नो । भृंगिरिटि
नेनमः । दक्षिणपार्श्वे स्कंदाय दक्षांसे उमायै अपरबाले । चंडीश्वराय हृदये । इंद्राय द
क्षिणपादे । अग्नये दक्षिणजानुनि । यमाय दक्षिणपार्श्वे । निर्ऋतये दक्षिणस्कंधे वरुण
य वामस्कंधे । वायवे वामपार्श्वे कुवेराय वामजानुनि । ईशानाय । वामपादे । ब्रह्मणे मस्त
के । अनंताय मूलाधारे । १ । एवं न्यासविधिं कृत्वा परमेश्वरानुसंधानार्थमिमं मंत्रं पठे
त् ॥ ॥ नमोस्तु स्थाणुरूपाय ज्योतिर्लिंगामृतात्मने । चतुर्मूर्त्तिवपुश्छायभासितांगाय
शंभवे । एवं मंत्रानुसंधाय ध्यायेद्देवं सदाशिवं । अथ ध्यानानि ॥ ॥ बिभ्रद्दोर्भिः कुठारं
मृगमभय वरं सुप्रसन्नो महेशः सर्वालंकारयुक्तः सरसिजनिलयो व्याघ्रचर्मान्नवा

स। ध्येयोमुक्तापरागामृतरसकलिताद्रिप्रभः पंचवक्त्रस्त्र्यक्षः कोटीरकोटीघटितशुचिन
रुचिर्निष्कलोत्तुंगमौलिः॥ इतिशुद्धपंचाक्षरीध्यानं॥॥ अथशाक्तिपंचाक्षरीध्यानं। वंदेह
रंवरदशूलकपालहस्तंसाक्षीतिमद्भितनयोज्ज्वलदेहकांतिं। वामोरुपीठगतयानिजवाम
हस्तन्यस्तारुणोत्पलयुजापरिरब्धदेहं। अथप्रासादपंचाक्षरीध्यानं॥ वामांकन्यस्तवामे
तरकरकमलायास्तथावामबाहुन्यस्तारक्तोत्पलायाःस्तनविधृतलसद्वामबाहुःप्रियाया
ःसर्वाकल्पाभिरामोधृतपरशुमृगाभीष्टदःकांचनाभोध्येयःपद्मासनस्थस्मरललि
तवपुःसंपदेपार्वतीशः॥ एवंक्रमेणयथोपदेशंध्यात्वाप्रार्थनापूर्वकंहृत्कमलेसदाशि
वस्यासनादिकंपरिकल्प्यमानसैरुपचारैःपूजयेत्॥ तत्रषोडशोपचारानथवापंचोप॰

चारानुपरिकल्पयेत्। पृथिवीतत्वात्मने गंधं व्योमतत्वात्मने पुष्पं। वायुतत्वात्मने धूपं तेज
स्तत्वात्मने दीपं। अमृततत्वात्मने नैवेद्यं परिकल्प्य। ततः सदाशिवोहमिति संज्ञाव्यशिवविग्रहः सन् गंधपुष्पाक्षतैरात्मानं संकली कृत्य गुरूपदिष्टमार्गेण मूलमंत्रं तदर्थानुचिंतन पूर्वकं जपेत्। मूलमंत्रस्वरूपं तु शुद्ध पंचाक्षरी मंत्रो द्विजादित्रैवर्णिकानां ॐकारपूर्वकं षडक्षरः स्त्रीशूद्रादीनां पंचाक्षरः तेषामोंकारस्य वेदादिभूतत्वात्तत्राधिकारः। न्यासे ष्वपि ॐकारपंचब्रह्ममंत्रैर्विना न्यत् कर्त्तव्यं। शाक्तिपंचाक्षरीमंत्रस्त्वादौ प्रणवस्ततो माया बीजमध्ये पंचाक्षरी पुनर्मायाबीजं एवं अष्टाक्षरी अर्द्धनारीश्वरात्मक प्रासादपंचाक्षरी मंत्रो आदौ प्रणवस्ततो मायाबीजं ततः प्रासादबीजं अंते पंचाक्षरी एवमष्टाक्षरी

पं.
१७

17

एतेषां नित्यजपे संख्या १०८ अष्टोत्तरशतं अथवा यथाशक्ति वा नैमित्तिककाम्यजपे वा
न्नामाणप्रकारेण कुर्यात्। जपविधिर्वाचकमुपांशुमानसमिति त्रिःप्रकारस्तत्र यथासं
न्नवविधिना जपेत्। जपगणना रुद्राक्षादिमालिकाभिः कार्या एतेषां लक्षणं निपुरतो व
क्ष्यामः। जपादौ प्रधानमुद्रां तदायुधमुद्राश्च दर्शयेत्। जपान्ते मूलेन प्राणानायम्य षडंगं वि
धाय ध्यात्वा शिवाङ्कयाविरमेत्। इति श्रीपंचाक्षरीमुक्तावल्यां न्यासजपविधिर्नाम द्वितीय
:श्रेणिः॥ इति प्रातःकृत्यं॥ अथ पूजाविधिरभिधीयते। पूजामंडपं प्रासादपाणि पादौ प्र
क्षाल्याचम्य मंडपस्य द्वारा न नागे स्थित्वा। ॐ सूर्याय नमः। ॐ क्षेत्रपालाय नमः। इति नत्वा
कपाटमुद्घाटयेत्। अथ पूर्वद्वारमागत्य द्वारपार्श्वयोर्दक्षिणे नंदिने नमः॥ वामे महाका

१७

नायनमः। चिल्लक्यै नमः। मायाशक्त्यै नमः। धात्रे नमः। विधात्रे नमः। गंगायै। यमुनायै।
शंखनिधये नमः। पद्मनिधये। ऊर्द्ध्वद्वारश्रियै नमः। अधोवास्तुपुरुषाय नमः। इतिसंपूज्यद
क्षिणद्वारमागत्य द्वारपार्श्वयोर्दक्षिणे गणपतये। वृषनायचिल्लक्यै। मायाशक्त्यै। धात्रे। वि
धात्रे। गोदावर्यै। स्वर्णनिधये। रत्ननिधये। ऊर्द्ध्वद्वारश्रियै। अधोवास्तुपुरुषाय नमः इ
तिसंपूज्य पश्चिमद्वारमागत्य द्वारपार्श्वयोर्दक्षिणे भृंगरिटिने नमः। स्कंदाय नमः। चिल्लक्यै
नमः। मायाशक्त्यै। धात्रे नमः। विधात्रे नमः। नर्मदायै। कृष्णवेण्यै नमः। यक्षनिधये नमः।
विश्वनिधये नमः। विश्वनिधये नमः। ऊर्द्ध्वद्वारश्रियै नमः। अधोवास्तुपुरुषाय नमः इतिसं
पूज्य उत्तरद्वारमागत्य द्वारपार्श्वयोर्दक्षिणे उमायै नमः। वामे चंडीश्वराय नमः। चिल्लक्यै न

मः॥मायाशक्त्यै नमः।धात्रे नमः।विधात्रे नमः।कावेर्यै नमः।तुंगभद्रायै नमः।धननिधये न
मः।गुप्तनिधये नमः।ऊर्ध्वद्वारश्रियै नमः।अधोवास्तुपुरुषाय नम इति संपूज्य समस्तपरि
वारसहितं श्रीसदाशिवमंडपाय नम इति संपूज्य प्रणमेत्।अथास्त्रमंत्रेण पुष्पमभिमंत्र्य
ज्वलद्रूपं ध्यात्वा नाराचमुद्रया मंडपे विनिःक्षिपेत्।क्रूरदृष्टिनिरीक्षणेन छोटिकया विघ्नरूं
धातानुत्साद्य निर्गच्छतां तेषां स्ववामांगसंकोचनेन पुरतो मार्गं दत्वा विघ्नान् बहिर्निःका
स्य पश्चिमद्वाराद्दक्षिणपादपुरःसरमंतः प्रविश्य मंडपमध्ये अधोवास्तुपुरुषाय नम इ
ति संपूज्य चित्रकंबलाद्यासनेन प्राङ्मुखोदङ्मुखो वोपविश्य मूलेन शिखां बध्वा गुर्वादीन
भिवंद्य गायत्र्या प्राणानायम्य देशकालौ संकीर्त्य श्रीसदाशिवप्रीत्यर्थं अमुककामनाश

सर्वं यथासंभवितोपचारैः श्रीसदाशिवपूजां करिष्ये तदंगभूतशुध्यादिकं करिष्ये इति सं
कल्प्य पूर्ववत् कृत्वा मूलेन प्राणानायम्य पूर्वोक्तऋष्यादिप्रधानन्यासान् कृत्वा स्वपुरतो वा
मभागे अस्त्रप्रक्षालितं मूलमंत्रपूरितोदकं कलशं तत्परिसरे अस्त्रप्रक्षालितमूलमंत्रपू
रितोदकं शंखं दक्षिणे पत्रपुष्पादिपात्राणि मध्ये पाद्यादिपात्राणि गंधादिकं पुरतो नि
धाय आदौ शंखपूजां कुर्यात् । गोमयेनोपलिप्य मध्ये स्वमुद्रया त्रिकोणषट्कोणवृत्तचतुर
स्रं यंत्रं संलिख्य दक्षिणकरेण शंखमुद्रामाबध्य त्रिकोणे वह्निदशकलात्मने नमः । धूम्रा
यै नमः । ऊष्मायै नमः । ज्वलिन्यै नमः । ज्वालिन्यै नमः । विस्फुलिंग्यै नमः । सुश्रियै नमः
स्वरूपायै नमः । कपिलायै नमः । हव्यवाहायै नमः । कव्यवाहायै नम इति सम्मन्त्र्य ष

क्षोणीषुआग्नेयेहृदयमंत्रंईशान्येशिरोमंत्रं·नैर्ऋत्येशिखामंत्रं·वायव्येकवचमं
त्रं·पुरतोनेत्रमंत्रं·सर्वतोऽस्त्रमंत्रंसमभ्यर्च्यमध्येशंखंप्रतिष्ठाप्यसंसूर्यमंडलायद्वादश
कलात्मनेनमः।तपिन्यैनमः।तापिन्यैनमः।धूम्रायैनमः।मरीच्यै·।ज्वालिन्यै·।रुच्यै·।सु
षुम्नायै·।भोगदायै।विश्वायै·।बोधिन्यै·।धारिण्यै·।क्षमायै·॥इतिशंखोपरिसमभ्यर्च्य
हृदयमंत्रेणगंधपुष्पाक्षतान्निधायप्रतिलोममातृकयाशिरोमंत्रेणचतीर्थमापूर्यतं
सोममंडलायषोडशकलात्मनेनमः।अमृतायैनमः।मानदायै·।पूषायै·।तुष्ट्यैनमः।पु
ष्ट्यै·।धृत्यै।शशिन्यै·।चंद्रिकायै·।कान्त्यै·।ज्योत्स्नायै·।श्रियै·।प्रियंगदायै·।पूर्णायै·।पूर्णामृ
तायै·।कामदायैनमइतिशंखजलेसमभ्यर्च्यतस्मिन्गंगाचयमुनाचैवगोदावरीसरस्व

तो ॥ नर्मदासिंधुकावेरीजलेस्मिन्संनिधिंकुरु ॥ कोमिसंकुशमुद्रयासवितृमंडला

त्तीर्थमाकृष्यवमित्यमृतीकृत्यतत्रावाह्यश्रीसदाशिवंध्यात्वावाहनादिमुद्राःप्रदर्श

शिखामंत्रेणगालिनीमुद्रयातज्जलंनिर्मलंकुर्यात्कवचमंत्रेणगरुडमुद्रयानिर्वि

षंकुर्यात् ॥ नयनमंत्रेणसुरभ्यमृतमुद्राभ्याममृतदृष्टिनिरीक्षणेनचतज्जलममृतंकु

र्यात् ॥ पुनःकवचमंत्रेणसंव्याप्यसकलीकृत्यतदंगेषंगानिविन्यस्यमूलेनगंधपुष्पा

क्षतैरभ्यर्च्यहस्तेनाछाद्यसप्तवारमूलमंत्रेणाभिमंत्र्यचक्रमुद्रयासंरक्ष्यतच्छंखज

लंकिंचित्कलशजलेमिश्रयित्वाकलशशंखवत्संस्कृत्यशंखजलंकिंचिदुपमात्रेगृ

हीत्वास्त्रमंत्रेणस्नानंयागगृहवनपूजोपकरणानिचसंप्रोक्षयेत् ॥ अथमूलेनषडंगंवि

ध्यायश्रीसदाशिवंध्यात्वामानसैरुपचारैःसंपूज्यशिवोहमितिसंभाव्यगंधपुष्पैरात्मा
नंसंकलीकृत्यमूलेनपुष्पत्रयंस्वशिरसिनिधायधूपदीपौसंकल्प्यमूलमंत्रमुच्चरन्नमृ
तमास्वाद्यनैवेद्यंविभाव्यदेवतामयविग्रहःसन्मूलमंत्रंयथाशक्तिजपित्वा।गुह्या
तिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं।सिद्धिर्भवतुमेदेवत्वत्प्रसादान्मयिस्थितः।इतिजपं
देवायनिवेद्यपुष्पादिकमाघ्रायॐलंबोदरायनमःइतिवामभागेनिक्षिप्यहस्तंप्रक्षाल्यनंस्व
त्मशुद्धिंविधायपूजामूर्त्तेर्मलापकर्षणस्नानंकारयित्वापुष्पैरलंकृत्यपीठेसंस्थाप्यपीठ
पूजांकुर्यात्।देवस्यदक्षिणेस्वगुरुंगुरुपत्नींचगंधादिभिरभ्यर्च्यवामेगणपतयेनमः
दुर्गायैनमः।क्षेत्रपालायनमः।सरस्वत्यैनमः।इतिसमभ्यर्च्यपीठाधोभागेआधारश

क्यै नमः। मूलप्रकृत्यै नमः। कालाग्निरुद्राय नमः। महामंडूकाय नमः। आदिकूर्माय नमः
वाराहाय नमः। अनंताय। पृथिव्यै। अमृतार्णवाय नमः। रत्नद्वीपाय नमः। हेमगिरये
नमः। नंदनोद्यानाय नमः। कल्पवृक्षाय नमः। मणिभूतलाय नमः। रत्नमंडपाय नमः। रत्न
सिंहासनाय नमः इत्युपर्युपरि पूजयेत्। तदुपरि चतुरस्रं पीठं परिकल्प्य पीठपादे
षु आग्नेयादि विदिक्षु। धर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्याय। पीठगा
त्रेषु। प्रागादि दिक्षु। अधर्माय नमः। अज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्याय न
मः। पीठमध्ये संसलाय नमः। रं रजसे नमः। तं तमसे नमः। मां मायायै नमः। विं विद्यायै न
मः। कं कंदाय नमः। नं नालाय नमः। पं पद्माय नमः। दं दलेभ्यो नमः। कं केतरेभ्यो नमः।

पं॰
२१

कंकर्णिकायैनमः। अं अर्कमंडलायनमः। उं सोममंडलायनमः। वं वह्निमंडलाय
नमः। अं आत्मनेनमः। उं अंकवचात्मनेनमः। मं परमात्मनेनमः। ईं ज्ञानात्मनेनमइति
समभ्यर्च्य प्रागादिदलेषु॰ वामायैनमः। ज्येष्ठायैनमः। रौद्र्यैनमः। काल्यैनमः। कलविक
रिण्यैनमः। बलविकरिण्यैनमः। दलप्रमथिन्यैनमः। सर्वभूतदलमथिन्यैनमः। मध्ये॰
मनोन्मन्यैनमः। ईं नमोभगवतेसदाशिवायसकलगुणात्मशक्तियुक्तानंतात्मयोग
पीठात्मनेनमइतिसमभ्यर्च्य। स्वहृदयस्थिरांमूलमंत्रमूर्त्तिंधारिणींगुरुस्वरूपांसप
रिवारांदेवतांध्यात्वादीपाद्दीपांतरमिवतन्मूर्त्तेःसकाशान्निर्गतांदेवतामूर्त्तिंसुषुम्ना
नाड्याबहिर्निर्गम्यपत्रपुष्पाक्षतसहितंस्वांतजलावानीयसर्वंतिर्यामिणींगुरुस्वरूपं

२१

नक्तानुग्रहग्रहीतविग्रहं ज्योतिर्मयं सर्वमंगलात्मकं सपरिवारं भगवंतं श्रीसदाशि
वमावाहयामीत्युच्चरन्मूलमंत्रपूर्वमावाहिन्यामुद्रयामूर्त्तावावाह्य पुनर्मूलमंत्रमुच्चा
र्य सर्वात्मन् भगवन् स्थापिनीमुद्रया स्थापितो भव । संनिधान्या संनिहित । संनिरोधिनी
मुद्रया संनिरुद्धः । अवगुंठनीमुद्रयावगुंठितः । संमुखीकरिण्या संमुखः । प्रसादिन्या प्र
सन्नामृतमुद्रयामृतीभव इत्युच्चरन् क्रमेण मुद्राश्च प्रदर्शयेत् । अथ पादेवतामूर्त्तेः कर
न्यासं वर्जयित्वा मूलेन षडंगन्यासं विन्यस्य प्रधानमुद्रास्तदायुधमुद्राश्च दर्शयेत् । अ
थ पाद्यार्घ्याचमनमधुपर्कार्थं चत्वारि पात्राण्यासाद्यास्त्रेण संक्षाल्य तदर्हद्रव्याणि ते
षु मूलमंत्रेण प्रक्षिप्य सुरभिमुद्रयामृतमास्थाय मूलेनाभिमंत्र्य गंधपुष्पैरभिध्यायमू

पं.
२२

लमंत्रपूर्वकं। ॐनमोभगवतेसदाशिवायपाद्यंकल्पयामीतिप्रत्येकंदद्यात्॥ ततःप्रार्थ
नापूर्वकंस्नानमंडपमानीयसुगंधतैलपंचामृतगंधपुष्पकुशफलरत्नोदकनालि
केराम्ररससुवासितकर्पूरशीतोदकैर्नानारुद्रसूक्तानिपठन्स्नापयेत्। अथपुनराच
मनंदिव्यवस्त्रोपवीताभरणानिप्रत्येकमाचमनानिचमूलमंत्रपूर्वकंदद्यात्॥ ततःपा
दुकामुद्रयापादुकान्परिकल्प्यप्रार्थनापूर्वकंश्रीसदाशिवंपीठंप्रत्यानीयतत्रो
पवेश्य। मूलमंत्रपूर्वकंगंधमुद्रयाशैवाष्टगंधैःसर्वांगमुपलिप्यशिवाष्टोत्तरशत
नामभिस्त्रिलाक्षतैर्यथासंभवमर्चयित्वाबिल्वादिनानापत्राणिशतपत्रादिनानापु
ष्पाणिपुष्पमुद्रयामूलमंत्रपूर्वकंसमर्पयित्वाऽऽवरणपूजांकुर्यात्॥ आदौहृद

२२

मध्ये तत्पुरुषायेति पूर्वे। अघोरेभ्य इति दक्षिणे। सद्योजातमिति पश्चिमे। वामदेवायेत्यु
त्तरे। ईशान इति मध्ये। आग्नेये निवृत्त्यै। नैरृत्ये प्रतिष्ठायै। वायव्ये। विद्यायै। ईशान्ये शां
त्यै। मध्ये शांतिदायै। सर्पमुद्रां दर्शयन् पूजयेत्। इति गर्भावरणं प्रथमं॥ ॥ अथ षट्
दलेषु। आग्नेये। ॐ ॐ सर्वज्ञशक्तिधाम्ने हृदयाय नमः। ईशान्ये ॐ नंदतृप्तिधाम्ने शिरसे
स्वाहा। नैरृत्ये ॐ मं अनादिबोधशक्तिधाम्ने शिखायै वषट्। वायव्ये ॐ शिं स्वतंत्रशक्ति
धाम्ने कवचाय हुं। पुरतो ॐ वां अलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट्। सर्वदिक्षु ॐ यं।
अनंतशक्तिधाम्ने अस्त्राय फट्। त्रिशूलमुद्रां प्रदर्शयन् पूजयेत्। इति द्वितीयावर
णं॥ ॥ अथाष्टदलपद्मस्य मूलेषु गंगादि। अनंताय नमः। सूक्ष्माय नमः। शिवोत्तमा

पं.
२३

यनमः॥ एकनेत्राय नमः॥ एकरुद्राय नमः॥ त्रिमूर्त्तये नमः॥ श्रीकंठाय नमः॥ शिखंडि
नेनमः इति पूजयेत्॥ इति तृतीयावरणं॥ तदग्रेषु प्रागादि॥ नंदिने नमः॥ महाकाला
यनमः॥ गणपतये नमः॥ वृषभाय नमः॥ भृंगरिटिने नमः॥ स्कंदाय नमः॥ उमायै नमः
॥ चंडीश्वराय नमः॥ इति पूजयेत्॥ इति चतुर्थावरणं॥ ॥ चतुरस्रे प्रागादि॥ इंद्राय न
मः॥ अग्नये नमः॥ यमाय नमः॥ निर्ऋतये नमः॥ वरुणाय नमः॥ वायवे नमः॥ कुबे
राय नमः॥ ईशानाय नमः॥ इति पंचमावरणं॥ ॥ वज्राय नमः॥ शक्तये नमः॥ दंडा
यनमः॥ खड्गाय नमः॥ पाशाय नमः॥ अंकुशाय नमः॥ गदायै नमः॥ शूलाय नमः॥ पू
जयेत्॥ इति षष्ठमावरणं॥ ॥ इदमावरणं शुद्धपंचाक्षरीविषये॥ अथ शक्तिपंचाक्षर्यां श्री॥

२३

वरणं ॥ ॥ अत्र मन्त्राक्षिकत्वात् वृत्तस्थले त्रिकोणं तत्र सद्योजातादिभिर्निवृत्यादिकला
भिर्गर्भावरणं प्रथमं ॥ षट्‌दलेषु षडंगैर्द्वितीयावरणं ॥ अष्टदलपद्ममूलेषु प्रागा
दि: रुद्रेश्वरायै नमः ॥ गगनायै नमः रक्तायै नमः ॥ करालिकायै नमः ॥ महोच्छुष्मायै न
मः ॥ गायत्र्यै नमः ॥ सावित्र्यै नमः । सरस्वत्यै नमः ॥ इति तृतीयावरणं ॥ तद्दलमध्येषु प्रा
गादि वृषभाय नमः ॥ क्षेत्रपालाय नमः ॥ चंडीशाय नमः ॥ दुर्गायै नमः ॥ स्कंदाय नमः ॥
नंदिने नमः ॥ विघ्नेशाय नमः ॥ सेनापतये नमः ॥ इति अष्टभिश्चतुर्थावरणं ॥ ॥ तद्दला
ग्रेषु प्रागादि ब्राह्म्यादिभिरष्टभिः पंचमावरणं ॥ ॥ भूपुटे इंद्रादिलोकपालैस्तत्तैर्वव
ज्रायुधैः षष्टमावरणं ॥ ॥ अथार्द्धनारीश्वरात्मकप्रासादपंचाक्षर्याश्चावरणं ॥ ॥ अत्रापि

मध्ये त्रिकोणं तत्र सद्योजातादिभिर्निवृत्त्यादिकलाभिश्च गर्भावरणं प्रथमं ॥ षट्
दलेषु षडंगैर्द्वितीयावरणं ॥ ॥ अष्टदलपद्मस्य मूलेषु अनंतादिभिरष्टभिस्तृतीयावर
णं ॥ ॥ तदग्रेषु उमादिभिरष्टभिश्च चतुर्थावरणं ॥ ॥ तत्रैवेंद्रादिलोकपालैः पंचमा
वरणं ॥ पुनस्तत्रैव वज्राद्यायुधैः षष्ठमावरणं ॥ ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्ण
वी तथा ॥ वाराही च तथेंद्राणी नारसिंही च चंडिका ॥ असितांगो रुरुश्चंडो क्रोध उन्म
त्तभैरवः ॥ कपाली भीषणश्चैव संहारश्चाष्टभैरवः ॥ ॥ एवमावरणदेवता गंधपुष्पा
क्षतैः संपूज्य मूलमंत्रपूर्वकं कृष्णागरु प्रमुखदशांगधूपं घृतकर्पूरवर्तिदीपं श्रीसदा
शिवाय सपरिवाराय कल्पयामीति समर्पयेत् ॥ अथ नैवेद्यार्थं पृथक् पात्रे षड्रसोपे

तचतुर्विंशत्यंहोमार्थं पृथक् पात्रे पायसादिहविषान्नमानीय पुरतो निधाय
अर्घ्योदकेन मूलमंत्रेण संप्रोक्ष्यास्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयामृतीकृत्य
ततो मूलमंत्रमुच्चार्य नैवेद्यं गृहाण स्वाहेत्यमृतोपस्तरणमसीत्युदकं दत्वा वामह
स्तेन ग्रासमुद्रां दक्षिणहस्तेन प्राणादिपंचमुद्राः दर्शयन् प्राणाय स्वाहेति पंचप्रा
णाहुतीर्दत्वा अमृतमुद्रया परिवारदेवतानां तृप्तिं विभाव्य श्रीसदाशिवप्रीत्यर्थं हो
मं करिष्य इति निश्चित्याज्ञया होमपात्रं गृहीत्वा देवस्य पुरतो दक्षिणे वा होमस्थाने स्था
मासाद्य पूर्वाग्निमुखवत् पवित्रपयुर्वादीन निबंध्यास्त्रेण तालत्रयं विधाय मूलेन त्रिः प्रा
णानायम्य अंगेषु रुष्यादिषडंगानि विन्यस्य चित्सिंगलेहन हन दह पच पच सर्वाज्ञा

पं.
२५

ज्वा

पयस्वाहा ॥ अनेन मंत्रेणाग्निं प्रज्वाल्य ज्वालनीमुद्रां प्रदर्शयित्वा वह्नौ वह्निपीठं परि
कल्पयेत् ॥ तद्यथा ॥ षट्कोणाष्टकोणचतुरस्रयंत्रं परिकल्प्य ॥ अस्य श्रीवैश्वानरमं
त्रस्य भृगुऋषिः गायत्री छंदः रमिति बीजं स्वाहेति शक्तिः वैश्वानरवाहने विनियोग
ः ॥ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वाणि कर्माणि साधय स्वाहा ॥ अनेन
मंत्रेण तत्र सपरिवारं वह्निमावाह्य गंधादिभिः संपूज्य वह्नौ सदाशिवपीठं यं
त्रमपि परिकल्प्य तत्र सपरिवारं सदाशिवं ध्यात्वा पूजामूर्त्तेः सकाशाद्दीपाद्दीपांतर
मिव श्रीसदाशिवमूर्त्तिं निर्गमय्य मूलमंत्रपूर्वकं तत्र संस्थाप्यावाहनादिमुद्रां दर्श।
यित्वा गंधादिभिः समभ्यर्च्य वह्निदेवतात्मैक्यं विभाव्य होमं कुर्यात् ॥ आज्येन प्रण

२५

वध्वाञ्जलीनीर्कुलाश्चाधारादिपीठदेवताभ्योसकृत्स्नकृत्तत्तन्नाममंत्रैर्कुलापायसादिहवि
ष्यान्नैराज्यादित्रिमधुकृतैर्मूलमंत्रेणाज्ञपदभ्रांतंच्छृत्वाक्वावष्टोत्तरशताकृतीर्कुलास
द्योजातादिपरिवारदेवताभ्यस्तत्तन्नाममंत्रैःसकृत्सकृत्वुलापुनर्व्याकृतीर्कुनेतृ च्छुथ
देवायहोमंसमर्प्यमंडपस्येशानभागेदिव्यान्नपूर्णसाधारणपात्रंप्रतिष्ठाप्यनीलां
जननिभंस्वरूपात्रधरंक्षेत्रपालंध्यात्वाक्षंक्षेत्रपालायनमइतिगंधादिभिःसंपूज्य क्षां
क्षींक्षूंक्षैंक्षौंक्षंक्षः॥हं स्थानक्षेत्रपालइमांपूजांबलिंगृह्णाणस्वाहाइत्युदकधारयाद्दंमु
द्रयाबलिंदत्वापाणिपादौप्रक्षाल्यदेवपीठसंनिधावपूजास्थानंसमागत्यश्रीसदाशिवायम
ध्येपानीयंउत्तरापोशानंहस्तप्रक्षालनंदत्वाश्रीखंडेनकरोद्वर्तनंपरिकल्प्यनैवेद्यमुद्धृत्य

स्थलशुद्धिं विधाय श्रीसदाशिवाय पुनराचमनं तांबूलं नानाफलानि पूजासाद्गुण्यार्थं य
थाशक्ति दक्षिणां दत्वा बहुदीपवरार्त्रिकेन राजयेत्। अथ मूलेन पुष्पांजलिं दत्वा प्रदक्षि
णनमस्कारान् कृत्वा वेदपुराणोक्तस्तोत्रैः स्तुत्वा छत्रचामरवादननृत्यगीतवाद्यैः संतोष्य मन्त्र
हीनं क्रियाहीनं भक्तिहीनं सदाशिव। यत्पूजितं मया देव परिपूर्णं तदस्तु मे इति प्रार्थयित्वा सा
क्षतपुष्पचुलुकोदकधारया श्रीसदाशिवपूजामिमां गृहाण स्वाहेति पूजां समर्प्य सपरि
च्छदमात्मानमात्मानं देवाय निवेद्य दासोहमिति संभाव्य स्वान्नीष्टान् प्रार्थयित्वा विसर्जनमुद्र
या देवस्य वालिंगे नीविन्यस्य [?] पुनरपि मूलेन पुष्पांजलिं दत्वा स्वात्मन्युद्वास्य षडंगं विन्यस्य ध्यात्वा
गंधादिभिरात्मानमभ्यर्च्य मूलमंत्रं यथाशक्ति जपित्वा कृतार्थोस्मीति संभाव्य बलिं बहिर्वि

मृज्य तीर्थे चोदास्य मंडलस्थ पुष्पमाघ्राय शिरसि निधाय ईशान्यां निर्माल्यानि मुक्त्वा
किंचित्स्वयं धृत्वा सन्मुखो बहिरागच्छेत्॥ यथाशक्ति शेवद्विजान् भोजयित्वा स्वयं भुंजीत
इति पंचाहरी मुक्तावल्यां पूजा विधिर्नाम तृतीयश्रेणिः॥ ॥ इति नित्य विधिः समाप्तः
अथ नैमित्तिके काम्ये विधिं वक्ष्याम्यशेषतः॥ विनियोगानुसारेण यथावच्छिवभाषितं॥
यस्त्वयोगं नियुंजीत कार्येषु विविधेषु च॥ विनियोगः स विज्ञेयो ऐहिकामुष्मिकार्थदः
तत्तत्कं जप्त्वा तु सेवार्थे विनियोगं समारभेत्॥ अत्र नैमित्तिके काम्ये न्यासध्यानार्चना
नि च॥ नित्य वित्युक्त मार्गेण कृत्वा कर्मानुसारतः॥ तत्तन्नियममास्थाय प्रोक्त स्थानेषु सं
यमी॥ वक्ष्यमाण विधानेन जपहोमादिकं चरेत्॥ अथादौ नैमित्तिक विधिरुच्यते॥ ॥ वि

पं.
२१

घ्नालक्ष्मीपरिहारार्थं मूलेनैकादशवारमंजलोभिः स्नायात्। तथैवाष्टोत्तरशतस्ना
नेन सर्वतीर्थस्नानजं पुण्यं लभते। अयनद्वये विषुवे चंद्रसूर्यग्रहे नाभिदघ्ने जले स्थित्वा
मोक्षपर्यंतं मूलमंत्रं जपन् पश्चाद्गुरुसंनिधौ ऽयुतं जपेन्निर्मलो भवति। आर्द्रायुतच
तुर्दश्यां शिवमभ्यर्च्याहोरात्रोषितो भूत्वा शिवसंनिधौ ब्रह्मकूर्चं संस्थाप्य मूलमंत्रमष्टस
हस्रं जपेत् सप्तजन्मपापान्मुक्तो भवति एवमेव कृष्णाष्टम्यां॥ ब॥ संध्योपासनविच्छेदे
मूलमंत्रमष्टोत्तरशतं जपेत्। इदमज्ञानकृते ज्ञानकृते तु सहस्रं जपस्तस्मान्मुक्तो
भवति॥ विड्वराहादिदुष्टसत्त्वैः पतितादिभिर्निषिद्धजनैः स्पृष्टं दुष्टमन्नं सूतकप्रेतशा
लागणिकान्नं पर्युषितान्नं च भुक्त्वा मूलमंत्रमष्टसहस्रं जपेत् पश्चान्मूलमंत्राभिमंत्रि

२१

पंचगव्यं पिबेत् शुद्धो भवति ॥८॥ रेतोमूत्रपुरीषापेयपाने त्वजस्त्रीनिषेवणे घृता
न्नं कृत्वा प्राणायामपूर्वकं मूलमंत्रमयुतं जप्त्वा ब्रह्मकूर्चं पीत्वा पुनरपि पंचायुतं जपे
त् शुद्धो भवति ॥८॥ पक्षिघातनेऽष्टोत्तरशतं गोव्यतिरिक्तश्वापदघातनेऽयुतं । स्त्रीशू
द्रबालहननेऽयुतं क्षेत्रियविट्गोवधे पंचायुतं । मूलमंत्रं जप्त्वा पश्चात्त्रिसंध्यं गुरुदे
वाग्निब्राह्मणानभ्यर्च्य प्राणायामपरो भूयात्तस्मात् पापान्मुक्तो भवति ॥८॥ ब्रह्मह
त्यादि महापातके मूलमंत्रं लक्षं जप्त्वा विंशत्सहस्रप्राणायामान् कृत्वा शुद्धो भवति
। किंचार्द्रानक्षत्रे प्राणायामे विशुद्धो भूत्वोंकारमुच्चरन् जलं पिबेत् । महापातकैर्मु
क्तो भवति ॥८॥ जितश्वासः सन् पंचलक्षं मूलमंत्रं जपेत् पश्चान्मूलमंत्राभिमंत्रितं ब्र

रूर्ध्वं जपेत् पितृमातृसमुद्भूतमस्थिमज्जासमागतं संचितवर्त्तमानागामिज्ञानाज्ञा
नकृतं पापं सर्वं विनश्यति ॥ ८ ॥ अयुततिलहोमेन सर्वपापशुद्धिर्भवति ॥ ९ ॥ इति नैमित्ति
कजपविधिः प्रायश्चित्तरूपेणोक्तः ॥ अथ काम्यविधिरभिधीयते ॥ महानदीतीरे दि
व्यं पर्वताग्रे लक्षं वा मूलमंत्रं जप्त्वा दूर्वांकुरतिलगुडीचीगुटिकाभिस्तद्दशांशं होमं
कृत्वा तद्दशांशं तर्पणं ब्राह्मणभोजनं कुर्यात् ॥ दीर्घायुर्भवति ॥ १० ॥ शनिवारे अश्वत्थवृ
क्षमाश्रित्य करेण तं स्पृष्ट्वा मूलमंत्रं लक्षं जपेत् दीर्घायुर्भवति ॥ ११ ॥ तत्रैवाष्टोत्तरशतं
जपेदपमृत्युविनाशनं भवति ॥ १२ ॥ मूलमंत्रेण पालाशसमिधैरयुतं जुहुयाद्धुता
नज्ञांतिर्भवति ॥ १३ ॥ आदित्याभिमुखो मूलाल्लक्षं जपं कुर्यात् मासपर्यंतं प्रतिदिन

मष्टशतार्कसमिद्भिर्मूलमंत्रेण होमं कृत्वा सूर्यमुपस्थापयेत् ॥ सर्वव्याधिनाशनं भ
वति ॥ ७ ॥ सूर्यसंनिधौ मासमेकं नित्यमष्टशतं मूलमंत्रं जप्त्वोदकं पिबेदुदरव्याधिविना
शो भवति ॥ ८ ॥ गजतुरगगवादीनां व्याधौ शिवमभ्यर्च्यायुतं मूलमंत्रं जपेत् परिहारो
भवति ॥ ९ ॥ भोज्यपेयादिकं नित्यं मूलमंत्रेणैकादशवारमभिमंत्र्य भुंज्यात् विषमप्य
मृतं भवति ॥ १० ॥ चंद्रसूर्यग्रहणे मोक्षावधि नदीजले मूलमंत्रं जप्त्वा पश्चादष्टोत्तरसह
स्राभिमंत्रितं ब्राह्मीरसं पिबेन्नागीशसमानवाग्भवति ॥ ११ ॥ अन्यच्च ॥ आर्द्रायुतहस्त
चतुर्दश्यां विषुवेऽयनद्वये ग्रहणे उपोषितो मूलात्मस्मना सर्वांगमुद्धूल्य शिवमभ्यर्च्य
तत्संनिधौ पालाशपात्रे कपिलाज्येनोदकेन च मिश्रितं श्वेतवचाचूर्णं मूलमंत्रेणायुत

वारमभिमंत्र्यं पिबेत् सर्वज्ञो ब्रह्मवर्चस्वी वाग्मी भवति ॥ ७ ॥ ब्रागारवायुक्तं हंसवागीश्वरी
बीजं शिवमूलमंत्रस्याद्यंतयोः संपुटं कृत्वा जपेत् सद्यः प्रत्ययमेष्यति । तथैव लक्षत्रयं
जपेत् सर्वशास्त्रार्थवित् भवति । तथैव पंचलक्षं जपेत् गंगाप्रवाह इव वाग् भवति
तथैव नित्यमष्टोत्तरसहस्रं मासं द्वादशावारं वा जपन् मेधावी भवति ॥ ८ ॥ बिल्वछायामा
श्रित्य मूलमंत्रमयुतं जप्त्वा तत् फलपुष्पपत्रैरष्टोत्तरसहस्रं जुहुयात् लक्ष्मीपरि
हारो लक्ष्मीप्राप्तिश्च भवति ॥ ९ ॥ अछिद्रैः पालाशपत्रैः शिवमंत्रेणायुतं जुहुयात् पु
त्रप्राप्तिर्भवति ॥ १० ॥ हिमवत् पर्वतशिखरे शिवमनुं चतुर्लक्षं जप्त्वा सर्ववर्णपुष्पैरयु
तं हुनेद्दिव्यौषधीदर्शनं भवति ॥ ११ ॥ पुनस्तत्रैव दशलक्षं जप्त्वा षण्मात्रं शिवमर्चयेत् ।

कुवेरस्यंदनं प्राप्य वैमानिको भवति ॥ प्रदोषे कृष्णपक्षे दुर्गामभ्यर्च्य शिवमनुं लक्षं ज
प्त्वा सर्वपुष्पैरयुतं हुनेत् साक्षाद्दुर्गापन्नपति ॥ समुद्रगामिनिनद्यां कंठदघ्नजले स्थित्वा सू
र्याभिमुखो शिवमूलमनुं लक्षं जप्त्वार्कसमिद्भिर्दशलक्षं होमं कुर्यात् । साक्षात्सूर्यस्थानदृ
ष्ट्वा ततः आयुरारोग्यबलस्मृतिज्ञानानि लब्ध्वा सिद्धो भवति ॥ मातृणामालये चतुर्लक्षं ।
शिवमनुं जप्त्वा चतुर्दश्यां गोचर्ममात्रं गोमयेन संलिप्य तत्र मंडपं कृत्वा वितानचामरघंटा
ध्वजपताकाभिरलंकृत्य तत्र सदाशिवमभ्यर्च्य वीरभद्रविघ्नेश्वरमातृणां च पूजनं कृ
त्वा शिवमंत्रेण जपाकुसुमैरयुतं हुनेत् ततो वीरभद्रविघ्नेश्वरमातृणां साक्षात्कारेण
अजरामरत्वं चक्रवर्तित्वं लभते ॥ शिवमूलमनुमयुतं जप्त्वाष्टोत्तरसहस्रं हुनेत्तत्र

पं.
३०
30a

ग्रहपीडापरिहारोभवति। तथैवायुतं जप्त्वा घृतेनाष्टशतं हुनेत् दुःस्वप्नपरिहारोभवति
॥ बिल्वीतकसमिद्भिर्मूलमंत्रेणाष्टोत्तरसहस्रं हुनेत् वैरिविद्वेषणंभवति ॥ तथैव सर्षपैस्तै-
लैरयुतं जुहुयाद्वैरिमारणंभवति ॥ सैन्यमध्ये बाणपुष्पैः सहस्रं हुनेत् सैन्यस्तंभोभवति
॥ ध्वनिवर्जिते निवाते मध्यरात्रे शिवमनुमयुतं जपेन्नादसिद्धिर्भवति। तथैव लक्षं जपेच्छि-
वज्योतिर्बिंदुसिद्धिः ॥ जितश्वासः सन् पंचलक्षं जपेत् पंचवायुसिद्धिर्भवति ॥ निगृहीतें-
द्रियः सन् पंचलक्षं जपेत् पंचेंद्रियोभवति। ध्यानयुक्तः सन् पंचलक्षं जपेत् पंचभूतजयो
भवति। दशलक्षं जपेत्सर्वकामना सिद्धिर्भवति। सर्वबीजैः संपुटं कृत्वा जपेत् सर्वार्थसाध-
नंभवति ॥ ज्ञाखादि संपुटं कृत्वा दशलक्षं जपेच्छिवसायुज्यंभवति ॥ अयनेमित्रिक

३०

काम्यहोमविधिरुच्यते॥ विधुक्तमार्गेण कुंडमंडपादिकं विधाय देशिकेन सहाचार्येणानायस्यामुककामार्थे कृतानां जपानां संपूर्णतासिध्यर्थं श्रीसदाशिवप्रीत्यर्थं उक्तद्रव्यैरुक्तसंख्यया होमं करिष्य इति संकल्प्य कुंडस्य संस्कारान् कुर्यात्॥ मूलमंत्रेण कुंडं वीक्ष्यास्त्रेण संप्रोक्ष्य तेनैव दर्भैः संताड्य कवचेनाभ्युक्षयेत्॥ अथ कुंडे दर्भमूलैः प्रागग्रा उदगग्रास्तिस्रस्तिस्रो रेखा लिखित्वा तत्र प्रागग्ररेखासु मुकुंदेशपुरंदरान् उदगग्ररेखासु ब्रह्मवैवस्वतेंदूनभ्यर्च्य तन्मध्ये त्रिकोणषट्कोणाष्टकोणवृत्तचतुरस्रयंत्रं संलिख्य मूलेन सर्वानभ्युक्ष्य कुंडं पूजयेत्॥ तत्र कुंडमध्ये नीलेंदीवरसप्रभां ऋतुस्नातां वागीश्वरेण संयुक्तां वागीश्वरीं ध्यात्वा गंधाद्युपचारैः संपूजयेत्॥ सूर्यकांतादिसंभूत

पं० ३१

31

श्रोत्रियागारस्थं वाग्निं पात्रेणानीय क्रव्यादांशं परित्यज्य देशिकश्चतुर्भिः संस्कारैः संस्कृ
त्य वामनाड्या प्राणपूरणसमं मायाबीजेन संहारमुद्रया तमग्निं मंत्रः समाहृत्य कूर्मा
ध्ये बिंदुसंबंधिनाग्निनाजठराग्निनाचैकीकृत्योद्भवमुद्रया मायाबीजेन पिंगलया रेच
केन हुं फ्रीं वह्निचैतन्याय नमः इत्यनेन मंत्रेण बहिःस्थितेग्नौ चैतन्यं जनयेत्। ततो मूले
नाग्निमंत्रं धेनुमुद्रयामृतीकृत्यास्त्रेण संरक्ष्य कवचेनावगुंठ्य गंधादिभिरभ्यर्च्य कुंड
स्योपरि त्रिः परिभ्राम्य भूमिस्थजानुको मूलमंत्रपूर्वकं आत्मसंमुखवह्निं शिवबीज
धिया देव्या योनौ विनिःक्षिपेत्॥ पश्चाद्देवस्य देव्याश्चाचमनादिकं दत्वा ॐ। चित्पिंगल ह
नहन चेपे पच दह दह सर्वज्ञाज्ञापय स्वाहा॥ अनेन मंत्रेण ज्वालिनीमुद्रां प्रदर्शयेत्

३१

गर्त्तसंरक्षणार्थं इंधनैराछाद्यास्त्रमंत्रेण दर्वीहस्ते दर्भकंकणं बध्वा। अग्निं प्रज्वालितं वंदे
जातवेदो कृतान्नानं सुवर्णवर्णमनलं समिद्धं विश्वतो मुखं। अनेन मंत्रेणाग्निं संपूज्य स्वदे
हे वह्निमासानं कुर्यात्। ते यथा॥ ॐ स्मृं पद्मरागायै अग्निजिह्वायै नमः लिंगे॥ ॐ ष्मूं सुव
र्णायै अग्निजिह्वायै नमः। पायौ। ॐ श्यूं नद्रलोहितायै अग्निजिह्वायै नमः शिरसि॥ ब्रूं लो
हितायै अग्निजिह्वायै नमः॥ वक्त्रे॥ ॐ स्रूं श्वेतायै अग्निजिह्वायै नमः घ्राणे। ॐ स्यूं धूम्रिन्यै
अग्निजिह्वायै नमः नेत्रयोः॥ ॐ ष्पूं करलिकायै अग्निजिह्वायै नमः व्यापकं। इति जिह्वान्या
सः॥॥ ॐ सहस्रार्चिषे हृदयाय नमः॥ स्वस्तिपूर्णाय शिरसे स्वाहा। उत्तिष्ठपुरुषाय शिखा
यै वषट्॥ धूमव्यापिने कवचाय हुं। सप्तजिह्वाय नेत्रत्रयाय वौषट्। धनुर्धरायास्त्राय फ

प.
३२

ट्। इतिषडंगंन्यासः॥ अग्नयेजातवेदसेनमः मूर्ध्नि। अग्नयेसप्तजिह्वायदक्षिणांसे। अग्न
येहव्यवाहनायदक्षपार्श्वे। अग्नये। अश्वोदरायदक्षकट्यां। अग्नयेवैश्वानरायलिंगे। अग्न
येकौमारतेजसेवामकट्यां। अग्नयेविश्वमुखायवामपार्श्वे। अग्नयेदेवमुखायवामांसे। इ
त्यमूर्त्तिन्यासः॥ इष्टंशक्तिंस्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतंजपाभं। हेमाकल्पंपद्म
संस्थंत्रिनेत्रंध्यायेद्वह्निंबद्धमौलिंजटाभिः। इतिवह्निंध्यायेत्। अथोदकेऊर्द्धमेखलायांप
रिधिंचमध्यमेखलायांदर्भैः परिस्तीर्यतृतीयमेखलायांपरिधीन्प्राचीवर्जंयथाक्रमं
निःक्षिप्यमेखलात्रयेब्रह्मविष्णुमहेश्वरानभ्यर्च्य अस्यश्रीवैश्वानरमंत्रस्यभृगुऋषिःगाय
त्रीछंदः रमितिबीजंस्वाहेतिशक्तिः। अग्निपूजनेविनियोगः॥ वैश्वानरजातवेदइहावह

लोहिताक्ष सर्वकर्माणि साधय स्वाहा इत्यग्निमंत्रेण वह्निं गंधादिभिरभ्यर्च्य यंत्रपूजां कु
र्यात्। ॐ स्रूं पद्मरागायै अग्निजिह्वायै नमः आग्नये। ॐ ष्रूं सुवर्णायै अग्निजिह्वायै नमः नैर्ऋ
त्ये। ॐ स्रूं भद्रलोहितायै अग्निजिह्वायै नमः वायव्ये। ॐ ब्रूं लोहितायै अग्निजिह्वायै न
मः ईशान्ये। ॐ ञ्रूं श्वेतायै अग्निजिह्वायै नमः पश्चिमे। ॐ स्रूं धूम्रिन्यै अग्निजिह्वायै न
मः पूर्वे। इति षट्कोणे मध्ये च अग्निजिह्वायै नमः अग्न्यादिकोणेषु मध्ये दिक्षु च। सह
स्रार्चिषे हृदयाय नमः आग्नेये। स्वस्तिपूर्णाय शिरसे इत्यादि नैर्ऋते। उत्तिष्ठपुरुषाय न
मः वायव्ये। धूमव्यापिने ईशान्ये। सप्तजिह्वाय पुरतः धनुर्धराय दिक्षु पूर्वादिदलेषु। अ
ग्नये जातवेदसे नमः आग्नेये। अग्नये सप्तजिह्वाय दक्षिणे। अग्नये हव्यवाहनाय नैर्ऋ

पं.
३३

33

त्ये अग्नये अश्वोदराय पश्चिमे। अग्नये वैश्वानराय वायव्ये। अग्नये कौमारतेजसे न
मः उत्तरे। अग्नये विश्वमुखाय ईशान्ये। अग्नये देवमुखाय नमः पूर्वे। इत्यष्टदलेषु। चतु
रस्त्रे पूर्वादिक्रमेण। इंद्राय अग्नये यमाय नैर्ऋतये। वरुणाय वायवे ईशानाय इति पूज
येत्। अथ पात्रासादनं॥ पाणिभ्यां स्रुक्स्रुवावानीयाधोमुखौ वक्षौ त्रिः प्रताप्यं तदग्रम
ध्यमूलानि दर्भाग्रमध्यमूलैर्यथाक्रमं संशोध्य वामहस्ते निःक्षिप्य दक्षिणहस्तेन प्रोक्ष्य पु
नः प्रताप्य दर्भानग्नौ विनिःक्षिपेत्। आत्मनो दक्षिणे कुशास्तरणे स्रुक्स्रुवौ निधाय तत
आज्यस्थालीमादायास्त्रेण संप्रोक्ष्य तस्यामाज्यं विनिःक्षिप्य मूलेन संवीक्ष्यास्त्रेण संप्रो॰
क्ष्यास्त्रेण संताड्य कवचेनास्गु वायव्यादंगारान्निरूह्य तत्र हृदयमंत्रेण स्थापयेत् दर्भै

३३

युगलमग्निनासंदीप्यहृदयमंत्रेणाज्येक्षिप्त्वानलेक्षिपेत् ॥ इदंपवित्रीकरणं ॥ पुन
रपिप्रज्वलितदर्भयुग्मेनकवचेननीराज्यदर्भमग्नौनिःक्षिपेत् ॥ इदमभिद्योतनं ॥ पुन
रपिप्रज्वलितान्दर्भान्युग्मेनकवचेनघृतेप्रदर्श्याग्नौनिःक्षिपेत् ॥ इदमुद्योतनं ॥ अंगा
रान्प्रसूत्यजलेनस्पृष्ट्वास्वपुरतोदर्भास्तरणेघृतस्थालींस्थापयेत् ॥ अंगुष्ठोपकनिष्ठि
काभ्यांदर्भौधृत्वास्त्रेणघृतस्योत्पवनंकुर्यात् ॥ पुनरपिकुशाभ्यांहृदयमंत्रेणात्म
सन्मुखघृतस्यसंप्लवनंकुर्यात् ॥ इतिघृतस्यसंस्काराः षट् कृत्वाज्येप्रादेशमात्रौद्वौ
दर्भौनिःक्षिप्यवामभागेइडानाडींदक्षिणेपिंगलांमध्येसुषुम्णांध्यात्वास्रुवेणदक्षि
णभागादाज्यंगृहीत्वाअग्नयेस्वाहेतिप्रत्येदक्षिणलोचने ॥ वामभागादाज्येनसोमा

पं.
३५

यस्वाहेतिवामलोचनेमध्याज्येनाग्नयेस्वाहेतिनाललोचनेजुहुयात् । पुनरपिस्रुवेन
वामनागादाज्यंगृहीत्वाग्नीषोमाभ्यांस्वाहेत्यग्निमुखे । दक्षिणनागपक्षेनाग्नयेस्विष्ट
कृतेस्वाहेत्यग्निमुखेजुहुयात् सर्वत्रकृन्मंत्रस्मरणपूर्वकंकुर्यात् प्रणवपूर्वकंस
कृत्व्याहृतीर्हुत्वात्रिवारमग्निमंत्रेणघृताहुतीर्हुनेत् ॥ ततोवह्नेर्गर्भाधाना
दिविवाहांतान् पंचदशसंस्कारान् कुर्यात् तद्यथा ॥ प्राणानायम्यवह्नेर्गर्भाधा
नंकरिष्य इतिसंकल्प्यप्रणवेनाष्टाज्याहुतीर्हुनेत् ॥ प्रतिकर्मएवंकृत्वाघृतकृतमू
लाग्रान् पंचदशसमिधोजुहुयात् । अथजिकांगमूर्त्तीनांक्रमाडुक्तमंत्रैः स्रुवेण ।
ज्यंगृहीत्वात्रसेकामेकैकाहुतीर्हुनेत् । ॐस्मूंपद्मरागायेअग्निजिकायेस्वाहा । अ

ग्निजिह्वायैइदंनमः। एवंसर्वत्र। ष्रूंसुवर्णायै· अग्निजिह्वायैइदंनमः। ड्रूंनइलोहिता
यै· अग्निजिह्वायैइदंनमः। व्रूंलोहितायै· अग्निजिह्वायैइदंनमः। स्रूंश्वेतायै· अग्नि
जिह्वायैइदंनमः। ध्रूंधूमिन्यै· अग्निजिह्वायैइदंनमः। भ्रूंकरालिकायै· अग्निजिह्वायै
इदंनमः॥ ॐसहस्रार्चिषेस्वाहा। स्वस्तिपूर्णाय· उत्तिष्ठपुरुषाय· धूमव्यापिने· सप्तजि
ह्वाय· धनुर्धराय· अग्न्यंगदेवतायैइदंनममेतिसर्वत्र। अग्नयेजातवेदसेस्वाहा। अ
ग्निमूर्त्तयेइदंनममेतिसर्वत्र। अ· सप्तजिह्वाय। अ· अहव्यवाहनाय। अ· अश्वोदराय
अ· वैश्वानराय। अ· कौमारतेजसे। अ· विश्वमुखाय। अ· देवमुखाय। अथसप्तजिह्वा
देवताः। अमर्त्येभ्यः॥ पितृभ्यः। गंधर्वेभ्यः। यक्षेभ्यः॥ नागेभ्यः। पिशाचेभ्यः॥ राक्षसेभ्यः

पं.
३५

॥ अथस्रुवेणचतुर्ज्जिराज्यंगृहीत्वातु वैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणि
साधयस्वाहावौषट् इतिमंत्रेणजुहुयात्॥ अथहोमनिर्विघ्नतासिध्यर्थंविघ्नेश्वरमंत्रेण
स्रुगाहुतीर्जुहेनत्॥ इत्यग्निमुखंविधाय मूलेनप्राणानायम्यपूर्वोक्तसकलन्यासान्कृ
त्वाश्रीसदाशिवंध्यात्वावह्नौपीठार्चनंकुर्यात्॥ आधारशक्तयेनमइत्यादि॥ एवंपूजिते
पीठेनाविमार्गेणपत्रपुष्पसहितंश्रीसदाशिवमावाह्यावाहनादिमुद्राःप्रदर्श्यदेव
तामूर्त्तेःषडंगंविधायप्रधानायुधमुद्रांदर्शयित्वापाद्याद्युपचारानुपरिकल्प्यव
ह्निदेवात्मैक्यंभावयेत्॥ तद्यथा॥ मूलमंत्रेणपंचविंशतिघृताहुतीःस्रुवेणजुहेनत्॥
तथानाडीसंधानार्थंमूलमंत्रेणैकादशाहुतीर्जुहेनत्॥ ततोजपदशांशंयथोक्तद्रव्ये

३५

गुरूपदेशमार्गेण कुर्यात्। यत्र होमद्रव्यं नोक्तं तत्र घृतमेवेति द्रष्टव्यं। तत्रादौ आधारा
दिपीठदेवताभ्यः प्रत्येकमेकैकाहुतीं कृत्वा ततो मूलमंत्रेण प्राधानहोमं कृत्वा पश्चात्
सद्योजाताद्यंगावरणदेवताभ्यस्तत्तन्नाममंत्रैर्यथाशक्ति जुहुयात् स्विष्टकृतं महा
व्याहृतीश्च कृत्वा वस्त्राभरणगंधपुष्पफलसहितां पूर्णाहुतिं कृत्वा घृतेन वसोर्धा
रां कुर्यात्। अथ गंधपुष्पाद्यैर्वह्निमभ्यर्च्य होमं देवाय समर्पयेन्नीवीमार्गेण देवं पी
ठे संस्थाप्य गंधपुष्पधूपदीपनैवेद्यादिछत्राद्युपचारैः संपूज्य स्तोत्रैः स्तुत्वा प्रदक्षिण
नमस्कारान् जपार्चनहोमादिकं देवाय निवेदयेत्। अथ तर्पणं। पीठस्थितदेवतामू
र्त्तिं पात्रांतरे निधाय मूलेन प्राणानायम्य पूर्वोक्तसकलन्यासान् विधाय ध्यात्वा पूर्ववत्

जलं संस्कृत्य। यथोक्तद्रव्यैर्होमदशांशं तर्पयेत्॥ यत्र द्रव्यमनुक्तं तत्रोदकमेव द्रष्टव्यं॥ आ
दौ आधारादिदेवतास्ततः प्रधानदेवतां मूलमंत्रेण अंगावरणदेवतास्तत्तन्नाममंत्रे
णांजलिना पात्रेण वा देवतामूर्ध्नि तर्पयेत्॥ तर्पणदशांशं मार्जनं पुष्पैर्दर्भैर्वा कुर्या
त्॥ पुनरपि देवं पीठे उपवेश्य गंधादिभिरभ्यर्च्य क्षमस्वेति क्षमाप्य साष्टांगं प्रणम्य
स्वाभीष्टमनोरथान् याचयेत्॥ लब्धवर इव महानंदसंदोहपुलकितो निर्याणमुद्र
या देवमुपसंहृत्य मूलमंत्रपूर्वकं स्वात्मन्युद्वास्य स्वदेहे षडंगं विधाय ध्यात्वा यथा
शक्ति जपित्वाग्रे विसर्जनं कृत्वा ब्राह्मणभोजनं कुर्यात्॥ इति श्रीपंचाक्षरमुक्तावल्यां
नैमित्तिककाम्यविधिर्नाम चतुर्थः श्रेणिः॥ ॥४॥ नित्ये नैमित्तिके काम्ये यथाविधक्दि

तंकमात्॥ वक्ष्यंतेदेशकालादिनियमंद्रव्यजातयः॥ तत्रादौमंत्रप्राप्तिहेतुदीक्षावि
धिरभिधायते मंतारंत्रायंतइतिमंत्राः दीयतेज्ञानंदीयतेपापमिति॥ दीक्षा॥ आदौ
सिद्धार्यादिभिर्मंत्रसिद्धिंविचारयेत्॥ अस्यषडक्षरस्यवैदिकमंत्राणांचसिद्धारिर्नवि
चारणीयः॥ शुभमासतिथिवारनक्षत्रयोगकरणचंद्रतारानुकूल्ययुक्तेशुभेदि
वसेशिवालयसमुद्रनदीतीरपर्वतगोष्ठादिशुभेदेशेगृहेवावेदिकांकृत्वागोमये।
नोपलिप्यतत्रसर्वतोभद्रंविलिख्यतत्रनवंकुंभंनिधायतस्मिन्सर्वौषधीपंचप
ल्लवपंचरत्नपंचगव्यानिनिःक्षिप्यशुद्धोदकेनापूर्यगंधाक्षतपुष्पवस्त्रैरलंकृत्यश्री
सदाशिवमभ्यर्च्यमूलेनाष्टोत्तरशतंकृत्वादेशिकःपूर्वदिनोपोषितंशुचिंस्नातंशुक्लं

प॰
३१

37

कृतं शिष्यं वेद्यामुपाग्निमुपवेश्य पुण्याहं वाचयित्वा मूलमंत्रेण तत्कलशोदकैः आ
तवारमभिषिंच्य दक्षिणहस्तं शिष्यस्य शिरसि न्यस्य निधाय दक्षिणकर्णे त्रिवारं मंत्रा
मुपदिशेत्॥ सिद्धिदोस्त्विति देशिकः शिष्यस्य शिरसि अक्षतान् दद्यात्। शिष्यस्तु दे
शिकमभिमतपूजाभिः संतोष्य यथाशक्ति ब्राह्मणान् भोजयेत्। ततो गुरोराज्ञया।
पुरश्चरणं कृत्वा नित्यजापी भवेत्॥ पुरश्चरणे चतुर्विंशति लक्षजपः। नित्ये अष्टोत्त
रसहस्रजपः॥ एवं कृते तस्य सिद्धिरचिरादेव भवति॥ अथान्यः पक्षः॥ सूर्यचंद्रग्र
हे तीर्थे सिद्धक्षेत्रे शिवालये सद्गुरुदर्शने तत्काल एव मंत्रमात्रकथनं सैव दीक्षा त
त्र मासादि न विचारणीयं। इति लघुदीक्षाविधिः॥ अथ देशाः॥ गृहे समफलं॥ गो

३१

ष्टपुण्यपावनतुलस्यश्वत्थबिल्वच्छायानदीसमुद्रतीरगिरिगह्वरशिवालयेषूत्तरोत्तरसं
ख्ययादशगुणितंफलं ॥ तत्रापिवृषवर्जितपश्चिममुखशिवालये ॥ तत्रापिमहादेवस
द्गुरुसूर्येन्दुदीपजलगोविप्रसंनिधानंपूर्वश्रेयस्करं ॥ अथकालः ॥ आकर्षणेवसं
तः ॥ विद्वेषणेग्रीष्मः ॥ उच्चाटनेप्रावृट् ॥ मारणेशिशिरः ॥ शांतिकेशरत् ॥ पौष्टिकेहेमंतः
॥ तत्रापिविशेषः ॥ वसंतेपूर्वाह्णं ॥ ग्रीष्मेमध्याह्नं ॥ प्रावृषिअपराह्णं ॥ शैशिरेसायं ॥ शरद्य
र्द्धरात्रं ॥ वसंतेप्रत्यूषं ॥ जपयोग्यकालः ॥ ॥ अथवारविशेषाः ॥ ॥ शांतिकेसोमवारः ॥ क
र्षणेभौमवारः ॥ मारणेबुधवारः ॥ शांतिपौष्टिकयोर्गुरुवारः ॥ स्तंभनेमंदवारः ॥ सर्वकर्म
णिभानुवारः ॥ अथनक्षत्रविशेषाः ॥ ॥ आकर्षणेकृत्तिका ॥ मारणेभरणी ॥ स्तंभनेज्येष्ठा

उच्चाटनेस्वाती। द्वेषणेशततारा। अथजपस्थानं॥ ॥पूर्वाद्यष्टदिक्षुअकारादिस्वरान्यु
ग्मंयुग्मंविलिख्यतथैवकादिपंचवर्गान्याद्यक्षरचतुष्टयंशाद्यक्षरचतुष्टयंलक्षइत्य
क्षरद्वयंक्रमेणलिखेत्॥ तत्रतत्स्थानाधिपस्याक्षरंयत्रभवतितत्कूर्ममुखंतत्सम्मी
पगेद्वेदिशौकूर्महस्तौ। पार्श्वस्थेद्वेदिशौकूर्मकुक्षौ। तदनंतरदिशौद्वेकूर्मपादौ। पृष्ठ
स्थागदिक्कूर्मपुच्छं॥ ॥इतिकूर्मचक्रलक्षणं॥ ॥मुखेसिद्धिः॥ करयोरल्पसिद्धिः। कुक्षौ
रोगप्राप्तिः॥ पादयोर्हानिः॥ पुच्छेनिधनं एवंज्ञात्वामुखएवजपस्थानंतत्रावकाशो।
यदिनस्यात्तदातत्रदीपंवानियुज्यतन्मुखउपविशेत्॥ अथदिङ्नियमः॥ ॥सर्वत्रप्रा
ङ्मुखोवास्वाभीष्टदेवताभिमुखोवेतिनियमः॥ ॥अथविशेषाः। ।स्तंभनेपूर्वमुखःवि

द्वेषे वह्निमुखः॥ मारणे दक्षिणमुखः। मोहने नैर्ऋतिमुखः शांतिके वरुणे पश्चिमामुखः
उच्चाटने वायव्यमुखः॥ धनार्थे उत्तरामुखः। मोक्षार्थे ईशानमुखः॥ अथास्तरणानि॥
ज्ञानार्थे कृष्णाजिनं॥ मोक्षार्थे व्याघ्राजिनं॥ पापक्षयार्थे कुशामयं॥ कीर्तिकामे श्वेतवस्त्रं॥
शान्तिचारे नीलं॥ व्याधिनाशने कंबलं॥ सर्वार्थे चित्रकंबलं॥ अथासनानि॥॥ वामोरु
णि दक्षिणपादं विन्यस्य दक्षिणोरुणि वामपादं न्यसेत्॥ इदं वीरासनं॥ वामजान्वोर्वो
रंतरे दक्षिणपादतलं विन्यस्य दक्षिजान्वोरंतरे वामपादतलं विन्यसे दिदं स्वस्तिका
सनं॥ अथवा वामपार्श्वे दक्षिणगुल्फं सपार्श्वे वामगुल्फं निदध्यादिदं स्वस्तिकासनं॥ वा
मोरुणि दक्षिणपादं विन्यस्य दक्षिणोरुणि वामपादं निःक्षिप्य दक्षिणहस्तेन दक्षिणांगु

प॰
३९

ष्टं वामहस्तेन वामांगुष्टं बिभृयादिदं पद्मासनं॥ अथ जपमाला॥॥ अंगुली निर्जपेस्य
मानफलं॥ अंगुलिरेखा निर्जप्ते ष्टगुणं फलं॥ गणना प्रकारः॥ सर्वांगुलीनी रंध्रं संलग्नं
किंचिद्कुब्जं कृत्वा हृदये निधाय मध्यमानामिकामध्य पर्वद्वय प्रादक्षिण्येनानामि
कामूल पर्वारभ्य मध्यमामूल पर्यंतं अंगुष्टाग्रेण वर्त्तयेत्॥ ततो मध्यमामूल पर्वा
रभ्यानामिकामूल पर्यंत मावर्त्तयेत्॥ एवमनुमप्रतिलोमरूपेण गणनां कुर्यात्।
पुत्रजीवमणिनिर्गणिते दशगुणं फलं पुत्रधनधान्यप्राप्तिश्च भवति॥ शंखशुक्ति
भिः शतगुणं श्रीप्राप्तिश्च॥ प्रवालैः सहस्रगुणं लोकवश्यता चा स्फुटिकैरयुत गुणं मो
क्षश्च॥ मौक्तिकैर्लक्षगुणं सौभाग्यप्राप्तिश्च॥ पद्माक्षैर्दशलक्षगुणं लक्ष्मीप्राप्तिश्च॥ रौ

३९

प्यसौवर्णैः कोटिगुणं सर्वार्थसिद्धिस्तथा॥ कृत्वा ग्रंथिस्त्रिः शतं कोटिगुणं पापक्षयस्तथा॥ रुद्राक्षै
रनंतगुणं फलं भुक्तिमुक्तिप्राप्तिस्तथा॥ अथ माला निर्माण विधिः॥ ॥ अजीर्णाशीर्णान्त्रे
वान् समानू मणीनानीय सद्योजातमिति मंत्रेण पंचगव्येर्जलैः संक्षाल्य वामदेवइ
ति गंधाक्षतपुष्पैरभ्यर्च्य अघोरेभ्य इति धूपदीपौ तत्पुरुषायेति नैवेद्यं। परिकल्प्य ई
शान इति प्रसेकं शतं शतमभि मंत्र्य पुनः पंचभिर्मेरोरभिमंत्रणं कृत्वा द्विजेन पुण्य
स्त्रिया निर्मितं ग्रंथिवर्जितं नवं शुभ्रसूत्रं त्रिवृतं कृत्वा संक्षाल्य मुखं मुखेन पृष्ठं पृष्ठे
न संयोज्य ग्रथयेत्॥ मेरुमुपरि योजयेत्॥ अनंतरं मूले नाम्ने यथासंख्यं कृत्वा मालिकां
गुरवे निवेद्य तस्मात् गृहीत्वा तया मातृकां जप्त्वा प्रधानजपं कुर्यात्॥ येन मंत्रेण संस्का

पं॰
५०

रं करोतितमेव जपेत्। तथा मातृकया त्वन्यं न जपेत्। दक्षिणहस्ते गृहीत्वा हृदि संधारयेद्वा
सम्यगपि धारयेदथवा धानं तथा जपेत्। वामहस्तेन न स्पृशेत्। न च करभ्रष्टां कुर्यात्। जपां
ते पूजयित्वा गोपयेत्। नष्टे जीर्णे त्रुटिते पुनः संस्कारपूर्वकं योजयेत्॥ अथांगुलिनि।
यमः॥ मोक्षार्थी त्वंगुष्ठेन मालां तु निःक्षिप्य मध्यमया चालयेत्। भुक्तिमुक्तिकामस्तु
मध्यमायां निःक्षिप्यांगुष्ठेन चालयेत्। शत्रुनाशाने तर्जन्यां स्थापयेत्। शान्तिकर्म।
ण्यनामिकायां। आकर्षणे कनिष्ठिकायां संस्थापयेत्॥ अथाक्षसंख्या॥ अष्टोत्तर
शतं। चतुःपंचाशत्। सर्वकामदं। मोक्षार्थे पंचविंशतिः। पौष्टिके सप्तविंशतिः। धना
र्थे त्रिंशत्। आभिचारे पंचदश॥ अथ जपलक्षणं॥ अक्षराणां मनसैवोच्चारणं मा

५०

नसंसर्वाग्नीष्टप्रदां किंचित्तस्यसैववक्ष्कतिगोचरोच्चारणं उपांशुः सचपुष्टिप्रदः। स्पष्ट
शष्टोच्चारितोवाचिकः सचवैरिमारणकरः। सर्वत्रमंत्रार्थानुचिंतनपूर्वकंजपंकु
र्यात्। अथजपनियमः॥ प्रौढपादः कंचुकीशावृतशिरावालावृतोमुक्तकेशोनग्नो
हस्तेश्वान्यंपत्रपन्नश्पृ एवनस्पष्टशान्नजपेत्। क्षुतनिष्ठीवनविजृंभणकंडूयनवृथाला
पांश्चवर्जयेत्। यदिप्रमादाद्भवतितदाचम्यदक्षिणकर्णमुपस्पृशेद्वाप्रधानदेवतां
स्मरेत्। अनासनःशयानोगच्छन्तुच्छिन्नतः रथ्यामंधकारेप्रसारितपादः कुक्कुटास
नोबहिर्जानुर्यानारूढोनजपेत्। यदिकार्यवशात्स्खलनचलनंभवतितदाचम्यप्रा
णानायम्यन्नूतशुध्यादिन्यासजालानथवाषडंगंवाकृत्वाजपेत्। अथपुरश्चर

रणं नियमः ॥ ॥ पुण्यक्षेत्रेषु जपस्थाननियमं व्रतनियमं च विधाय तत्र युगधर्मे
ण श्लोकसंख्यायाश्चतुर्गुणं जपं कुर्यात् ॥ प्रत्यहं जपांते पुरश्चरणांते तद्दशांशं होमं
कुर्यात् ॥ नित्यं त्रिषवणं स्नानं पंचगव्येनामलकेन गात्रोद्वर्तनं कुर्यात् ॥ जपार्चन
होमतर्पणब्राह्मणभोजनमिति पंचांगोपासनं नित्यत्वेन कृत्वा पश्चात् पुरश्चर।
णांगजपं कुर्यात् ॥ लवणक्षारमाक्षुगृंजनपलांड्वादिनिषिद्धानि तथा क्षौद्रतांबू
लकांस्यभोजनखट्वाशायनस्त्रीनिषेवणगंधमाल्यधारणगीतवाद्यश्रवणदिवा
स्वापास्संगरथोपसर्पणपरापवादादीवर्जयेत् ॥ गर्भाधानादिसंस्काराणां श्राद्धा
दिक्रियान्नशूद्रादिनिषिद्धान्न पर्युषितादिस्वभावदुष्टान्नकेशकीटादिसंसर्गदु

ष्टान्नस्त्र्यादिस्पृष्टान्नानि च मनसापि नेच्छयेत् ॥ क्षीरफलमूलशाकहविष्यान्निज्ञाहारो
भवेत् ॥ तत्र पूर्वं पूर्वं श्रेयः ॥ तदपि हितमितमेध्यमेव भुंजीयात् ॥ भूमिशायी ब्रह्म
चारी मौनी देवतापरायणो भूत्वा यथासंख्यं जपांते होमतर्पणब्राह्मणभोजनानि
कुर्यात् ॥ अथ पूजाद्रव्यनियमादयः ॥ ॥ अस्य श्रीरुदये सूर्ये स्थंडिले प्रतिमासु खा
नीष्टदेवतापूजां कुर्यात् ॥ तत्र प्रतिमा द्विविधा स्थावरा जंगमा चेति ॥ स्थावरापि
द्विविधा ॥ स्वयंभूः कृत्रिमा चेति ॥ यत्र यत्र भक्तानुग्रहार्थं स्वयमेव देवता विग्रहा
विर्भवस्ताः स्वयंभुवः ॥ यत्र यत्र तु एपल्लेत्रेषु देवसिद्धर्षिमनुष्यनिर्मितास्ताः कृति
माः ॥ जंगमापि द्विविधाः ॥ स्वयंभूः कृत्रिमा चेति ॥ यत्र गंडक्यादितीर्थप्रभावात्स्वय

मेवदेवताविग्रहरूपा भवन्ति ताः स्वयंभुवः ॥ शिल्पशास्त्रज्ञैर्यथाशास्त्ररूपप्रमाणतो
निर्मिताः ॥ कृत्रिमाः ॥ रत्नधातुशिलादारुमृल्लेखनादिनिर्मा नानाविधाः ॥ ॥ अथ जंगा-
मप्रतिमानां लक्षणमुच्यते ॥ ॥ तत्र स्वयंभूलक्षणं गंडकीनद्यां सोमेश्वरक्षेत्रे शि-
वनाम्ना ख्याः शिला भवंति तल्लक्षणं अधः कपिलवर्णः पार्श्वे श्यामलवर्णः उपरि
उन्मत्तमहिषनेत्रवदुत्कटं तत्र सदाशिवस्य पार्वत्याश्च सांनिध्यं सर्वापेक्षयोत्कृष्टं वेदि-
तव्यं ॥ नर्मदायां बाणतीर्थे बाणलिंगाख्या शिला भवंति तल्लक्षणं पार्श्वे बाणरेखांकि-
तः श्वेतवर्णो मध्याज्यगो धूम्रवर्णो बाणलिंगाकृतिः तत्र परमेश्वरस्य सदा सांनिध्यं त-
त्कृष्टं वेदितव्यं ॥ ॥ अथ कृत्रिमप्रतिमालक्षणं ॥ ॥ लेख्या लेप्या धातुमयीति त्रिविधा

यंत्रमंत्राक्षररचित्रात्मकालेख्या। मृन्मयालेप्या। सुवर्णादिधातुविकाराधातुमयी॥ तत्र करचरणाद्यवयवयुक्तप्रतिमापेक्षया लिंगरूपप्रतिमैव शिवपूजार्थमुत्कृष्टा। तथाहि॥ सुवर्णलिंगं सौभाग्यप्रदं॥ राजतं यशोवर्द्धनं। ताम्रं यशस्करं॥ पारदं सर्वसिद्धिदं॥ सैकतं भूरिगुणदं॥ काश्मीरं श्रीकरं॥ नवरत्नमयं स्फाटिकं मारकतं पार्थिवं सर्वार्थप्रदं॥ नस्मोत्थं मोक्षदं॥ हारिद्रं प्रीतिवर्द्धकं॥ गंधोत्थं भोगप्रदं॥ शर्करोत्थं पुत्रदं॥ लवणोत्थं मासुरकरं॥ तिलपिष्टोत्थं ग्रामप्रदं॥ तुषोत्थं मारणकरं॥ रजनीपिष्टोत्थं स्तंभनकरं॥ तंडुलपिष्टजं सारस्वतप्रदं॥ दधिदुग्धनवनीतोत्थं कीर्त्तिसौभाग्यसुखप्रदं॥ धान्यजं। धान्यप्रदं॥ फलजं फलदं॥ पुष्पजं पुष्पदं॥ केशास्थिसंभवं सर्वशत्रुनाशकं॥ वंशा।

ऊरोत्थं वंशवर्द्धनं ॥ गोमयजं रोगहरं ॥ दूर्वागडूचीसंजवं अपमृत्युनाशकं ॥ लाक्षासु
च्चाटनकरं ॥ एतेषां प्रमाणं ॥ लिंगमानसमं पीठं दीर्घविस्तारसंयुतं ॥ तदर्द्धं गोमुखा
कारं तदर्द्धं लिंगमुच्यते ॥ इतिदं पंचसूत्रं ॥ ॥ अथ पूजाप्रकारः ॥ जले पुष्पैः ॥ अग्नौ हवि
र्भिः ॥ हृदये ध्यानेन ॥ सूर्यजपेन ॥ स्थंडिले भावनया ॥ प्रतिमायां नानोपचारैः पूजां कुर्या
त् ॥ उपचाराः पंच षोडशा द्वात्रिंशत् ॥ गंधपुष्पधूपदीपनैवेद्यानीति पंचोपचाराः ॥ आ
वाहनासनपाद्यार्घ्याचमनस्नानवस्त्रयज्ञोपवीतगंधपुष्पधूपदीपनैवेद्यप्रदक्षिण
नमस्कारविसर्जनानीति षोडशोपचाराः ॥ आवाहनपाद्यार्घ्याचमनमधुपर्कस्नान
वस्त्रोपवीताभरणगंधाक्षतपुष्पधूपदीपनैवेद्यतांबूलदक्षिणाफलनीराजनमं

त्रपुष्पप्रदक्षिणानमस्कारस्तोत्रछत्रचामरवाहननृत्यगीतवाद्यप्रार्थनाविसर्जनानी
तिद्वात्रिंशदुपचाराः॥स्थावरप्रतिमायामावाहनं नकुर्यात्॥तत्रपरमेश्वरस्यस्वतःसां
निध्यं॥जंगमप्रतिमायामावाहनविकल्पः॥शिवनाम्नो बाणलिंगेचावाहनं नकुर्यात्
॥तत्रापिपरमेश्वरस्यनित्यसांनिध्यं॥सुवर्णादिलिंगेष्वावाहनमवश्यंकुर्यात्॥तत्रसां
गंसपरिवारंसशक्तिकमिति प्रधानदेवतावाहनेनैवांगावरणावाहनंजायतेते
षांपृथगावाहनंनास्ति॥वाहनारूढमावाह्यवाहनादवतार्यच॥करावलंबनाद्देवा
मासनेनूपवेशयेत्॥नवरत्नचित्रितदुकूलादिवस्त्रमासनार्थंकल्पयेत्॥चर्मपाषा
णेष्टिकायसमासनेवर्जयेत्॥हैमराजतताम्राणामन्यतमंपात्रंपाद्यार्घ्यपृथुवर्तुलं च

पं.
४४

घार्थे र्ग्रंजलिसमं गोसुखाकारं। आचमनार्थे गोकर्णाकृति पात्रं कुर्यात्। तेषां द्रव्यं पद्मं विल्वपत्रं दूर्वा श्यामकं। चत्वारि पाद्यद्रव्याणि॥ गंधाक्षतपुष्पकुशातिलसर्षपयवदूर्वा इत्यष्टार्घ्यद्रव्याणि॥ जातीलवंगकंकोलमिति त्रीण्याचमनद्रव्याणि॥ हैमराजतकांस्यमयं मधुपर्कपात्रं तत्र मधुदधि सुवर्णादिकलशं स्नानोदकपात्रं स्वयं त्रिष्पोवास्तुचिर्तूत्वाजलसमीपं गत्वा जलदेवतां नमस्कृत्य गंगेत्यादि सूर्यार्घ्यमाकृष्य तत्र संनाद्य मूलेनाभिमंत्र्य वस्त्रपूतं जलं गृहीत्वा दक्षिणहस्तेन दक्षिणकक्षां वा निधायाहरेत्॥ शिरसा स्कंधेन वा नाहरेत्॥ पर्युषितं क्षारं दुर्गंधि फेनबुद्बुदयुक्तं शूद्राकृतं क्रयक्रीतं जलं वर्जयेत्॥ नागीरथीजलस्य पर्युषितादि र्न विचारयेत्॥ गव्यक्षीरदधिघृतमधुशर्

४४

र्कराः पंचामृतानि॥ नानासुगंधवासितो गंधोदकः। कुशायुक्तो कुशोदकः॥ हिमसारः पु
ष्पोदकः॥ कर्णाटकभाषया पन्नीर इति वदंति॥ नारिकेलरसा लेक्षुरसाः फलोदकः॥
रत्नयुक्तो रत्नोदकः। यद्यपि शंखस्य शिवार्जने निषेधस्तथापि ब्रह्मोत्तरखंडे शिवाभि
षेके विहितत्वाच्छंखेन वा सुवर्णादिधारापात्रेण वाभिषेकं कुर्यात्॥ अभ्यंगद्रव्यं॥ पु
ष्पवासित तैलं गव्यघृतं तिलतैलं वा॥ उद्वर्तनार्थं शालिपिष्टं सुगंधियुक्तरजनीपि
ष्टं वा। तैलापकर्षणार्थं शिलाचूर्णं शर्करा निंबूरसाः॥ स्नानार्थमुष्णोदकं॥ पात्रांतरे
ण सिंचेत्॥ करार्येरुदकं न सिंचेत्॥ अंगुलीभिर्न मर्दयेत्॥ नखैरपि नोत्कीरयेत्॥ किं
तु वराहकेशमुंजैरुद्धर्षयेत्॥ रत्नस्वर्णचित्रित पट्टदुकूलादिश्वेतवस्त्रं परिधानार्थे

पं॰ ४५

कल्पयेत्॥ नील रक्तं तु कं जीर्णं खंडितं वर्जयेत्॥ सौवर्णं राजतं कर्पासं वा यज्ञोपवीतं ॥ नवरत्नखचितस्वर्णान्निरणां वेस्त्रोपवीतान्नरणां नांनिर्मान्यत्वं नास्ति किंतु रत्नस्वर्ण मयानां हस्तेन निर्मलीकरणं॥ पट्टवस्त्राणां जलैः प्रोक्षणं॥ श्वेतवस्त्राणां जलैः स्नानं कृत्वा प्रत्यहं समर्पयेत्॥ चंदनं अगुरुकर्पूरं पत्रं कुंकुमकेसरं रक्तचंदनं कोष्टं नद्रमुद्रा॥ इति शैवाष्टगंधं॥ तथैव बिल्वचंदनमपि शिवप्रीतिकरं॥ शुद्धाऽखंडिता॥ धौताः शालितंडुलाः श्वेततिलयुक्ताः शिवप्रीतिकराः॥ अथ पुष्पाणि॥ परमपरमुत्तममध्यमाधममिति पंचविधं पुष्पाणि॥ मणिरत्नसुवर्णादिनिर्मितं परं॥ चित्रवस्त्रनिर्मितं अपरं॥ वृक्षजं उत्तमं मध्यमं॥ पत्ररूपमधमं॥ पराणां अपराणां निर्मा

स्पत्वं पर्युषितत्वं नास्ति संमार्जनप्रोक्षणाच्छुद्धिः॥ कमलं शतपत्रं उत्पलं कुमुदं धत्तू
रमेतानि श्वेतानि रक्तानि नीलान्यपि शिवप्रियकराणि॥ आवंतिकामल्लिकात्वगस्त्यं
करवीरं एतानि श्वेतानि रक्तान्यपि शिवार्हाणि॥ जातीपाटलपुन्नागकुंदकांचनके
सरप्रवालवकुलकल्हारमालतीकदंबतिलकनंदिकावर्तगोकर्णद्रोणबृहतीमं
दारार्करसालमुख्यानि पुष्पाणि शिवप्रीतिकराणि॥ चंपककेतकीजपापुष्पाणि
वर्जयेत्॥ शिरीषशाल्मलीशिग्रुकोशातकीएरंडकोविदारचिंतिमूत्रपुरीषोत्था
नि उग्रगंधनिर्गंधलुंठककेशकीटादिदूषितपर्युषितपुष्पाणि च वर्जयेत्॥ करवीर
कुरवकानि पाटलानि वासनावधि शुद्धानि न दूर्वं पर्युषितानि भवंति॥ तथैव जा

पं.
४६
46

तीपुष्पंमुहूर्तं॥पुन्नागकुटजानियाममात्रं॥नारंगंमल्लिकाप्रहरद्वयं॥चंपकमहोरा
त्रं॥शतपत्रंद्विरात्रं॥उत्पलंत्रिरात्रं॥वकुलंकेतकंपंचरात्रं॥अथफलानि॥ ॥ना
रिकेलाम्रपनसकदलीखर्जूरनारंगमातुलिंगदाडिमबदरीद्राक्षाजंबूजंबीरे
क्षुमुख्यानिशिवयोग्यानिफलानि॥अथपत्राणि॥बिल्वतुलसीदूर्वापामार्गशा
मीमाचीदमनिकागस्त्यमुख्यानिपत्राणिशिवार्हाणि॥बिल्वतुलसीदूर्वाणां
पर्युषितत्वंनिर्माल्यत्वंनास्तिप्रक्षाल्यपुरर्पयेत्॥एतानिपुष्पफलपत्राणिस्वयं
रोपितवृक्षजातानिमहोत्कृष्टानि॥अस्वामिकवनानीतानिमध्यमानि॥स्वीकृता
न्यधमानि॥याचनया चौर्येणानीतानिव्यर्थानि॥एतेषामाहरणविधिः॥॥पाणि

४६

पादौ प्रक्षाल्याचम्य प्रांजलिर्वृक्षाभिमुखो भूत्वा ॐ नम इति वनदेवतां प्रणम्य तस्यै
पुष्पमेकं व्योम्ने पुष्पमेकं पृथिव्यै पुष्पमेकं दत्वा पूर्वाभिमुखो विकासशीलानि मुकु-
लानि संचिनुयात् ॥ वृक्षोपरि विकसितानि अधः पतितानि कोमलमुकुलानि च व-
र्जयेत् ॥ एरंडपत्रेन बध्नीयात् कदल्यादिशुद्धपत्रेषु संस्थाप्य जलैः संक्षाल्य हस्तेना-
नीयात् ॥ अथावरणपूजाविधिः ॥ पूज्यापूजकयोर्मध्यदेशएव पूर्वादिक् न तु सू-
र्योदयस्थानं ॥ पूज्यस्य देवस्य मुखं यस्यां दिशि वर्त्तते सैव दिक् प्राची तदारभ्य अंगाव-
रणादिकं कल्पयेत् ॥ पंचायतनेषु मध्ये प्रधानभूतः सदाशिवः ॥ तस्य ईशान्यां हरिः ॥ आ-
ग्नेयां सूर्यः । नैर्ऋत्ये गणेशः । वायव्यां देवी ॥ पूजाक्रमस्तु आदौ प्रधानदेवतां ततो गणे-

पं० ४१

47

शं ततो देवीं ततो विघ्नं ततः सूर्यं एवं पूजयेत। दद्यांगं कस्तूरागुरुं गुग्गुलुं वा निर्धूमांगा
रेषु निःक्षिप्य व्यजनेन तु चैवं वीजयेज्जयजयेति स्तोत्रं कुर्वन् मंगलवाद्यं वादयेत। गो
घृतोक्तकर्पूरयुक्तवर्त्तित्रयं वह्निप्रज्वलितं दीपमुख्यैर्नीराजयेदत्रापि स्तोत्रवाद्यघो
षमपि कुर्यात॥ अथ नैवेद्यं॥ लेह्यं पेयं चोष्यं रनाद्यमिति चतुर्विधं। तत्र मधुराम्ल
कटुक्षारकषायतिक्ताः षड्रसाः॥ सप्तमो लवणरसः एतेषां प्रत्येकं मेलनान्नानावि
धाश्चित्ररसा भवंति॥ तेषां पाकस्तु पंचधा॥ आतपपाकः॥ अंगारपाकः॥ भांडपाकः॥
जलपाकः॥ तैलपाकः॥ तत्प्रकारस्तु अन्नं पायसं सूपः शाको भाज्यं कषिकं लड्डुएड्डा
क इति सप्तप्रकारः॥ अथ तेषां भेदाः॥ शाल्यन्नं कृसरान्नं क्षीरान्नं दध्यन्नं गुडान्नं तिल

पिष्टान्नं मुद्गान्नं माषान्नं घृतान्नमित्यन्नभेदाः॥ मुद्गादिद्विदलधान्यैः कृतसूपः॥ पय
सा कृतसंयावादि नानाविधं पायसं॥ शालादिपत्ररूपो बहुविधः शाकः॥ अपूपवटकल
डुकपारिकाशष्कुलीपूरिकामंडकादीनि भक्ष्याणि॥ तक्रामलकतिंतिणीकपित्थाम्रब
दरीमुख्यास्तु द्रव्यकृतः कथिकः॥ नैवेद्यपात्रं स्वर्णरौप्यकांस्यमयं पद्मपालाशाकदली
ब्रह्ममधुजं वाम्रपत्रमयं वा॥ मृन्मयं ताम्रमयं भिन्नं पाषाणलोहदारुमयं पल्लवेकरे
वस्त्रे भूमौ च वर्जयेत्॥ मध्ये पानार्थं स्वर्णकमंडलूदकपूर्णं हस्तप्रक्षालनार्थमुष्णोदकं
करोद्वर्तनार्थं श्रीखंडं पर्णानि समसंख्यानि॥ कर्पूरवासितानि क्रमुकानि विषमानि॥ सु
क्ताचूर्णं॥ एलालवंगनागरखदिराः एतैः समायुक्तं तांबूलं॥ फलानि नानाविधानि॥ भूम

पारुण्यपार्थं यथाशक्ति दक्षिणा ॥ नानाविधार्त्रिकेनीराजनं वाद्यघोषसहितं कुर्यात्
॥ वृषं चंडं वृषं चैव सोमसूत्रं पुनर्वृषं ॥ चंडं च सोमसूत्रं च पुनश्चंडं पुनर्वृषं ॥ नमस्कुर्वन्
प्रदक्षिणं कुर्यात् ॥ त्रयमावश्यकं ततो यथाशक्ति ॥ एकं प्रदक्षिणं न कुर्यात् ॥ उरसा शि
रसा दृष्ट्या मनसाश्वरूपापि च ॥ पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामो ष्टांग उच्यते ॥ एकं प्रणामं
एकहस्तप्रणामं न कुर्यात् ॥ स्वर्णरौप्यपट्टवस्त्रादिनिर्मितं शशिनिभं छत्रं ॥ दीर्घदंडोत्कृ
ष्टांकितो ध्वजः ॥ चैलांचितोर्ध्वदंडः पताका ॥ चमरीवालसमूलखचितस्वर्णादिदंडश्चा
मरं मनुष्यवाह्यं स्वर्णरौप्यगजदंतनिर्मितं चतुरं तयानं यानं ॥ हस्त्यश्वरः वाहनं ॥ पादच
तुष्टयगात्रचतुष्टयसुक्तदीर्घचतुरस्त्रं मृदुतूलोपधानास्तरणमंडितं स्तंभचतुष्टयो

परिवितानवितानंमंचकं।तद्देवचतुःकोणबद्धस्तंभंस्वर्णानिर्लंबमानंदोला।म
णिमयंकांस्यमयंमुकुटं।नानाकलासहितंपादचालनंनृत्तं।द्वात्रिंशद्रागप्रबंधकला
योगीतं।कांस्यंतातंवंसुषिरंचार्ममयंहस्ततालमितिपंचवाद्यं।घंटावाद्यमेवसर्ववा
द्यात्मकं।ततोविसर्जनं।स्थावरेशिवनाम्नोबाणलिंगेचविसर्जनंनास्ति।अन्यत्रकु
र्यात्।ततोनिर्माल्यग्रहणं।यत्रचंडीश्वरोवर्त्तते।तत्रनिर्माल्यग्रहणंनकुर्यात्।
बाणलिंगेरत्नलिंगेरसलिंगेस्फटिकलिंगेस्वायंभुवेचंडीश्वराधिकारोवास्ति अ
त्रनिर्माल्यग्रहणंकुर्यात्।अन्यत्रनकुर्यात्।इतिपूजाप्रकारःसमाप्तः॥ ॥अथहोम
विधिः॥ ॥कोटिहोमेअष्टहस्तंकुंडं।अर्द्धकोटौसप्तहस्तं।दशलक्षेषट्हस्तं।पंचल

क्षे पंचहस्तं। एकलक्षे चतुर्हस्तं॥ अर्द्धलक्षे त्रिहस्तं॥ अयुते द्विः। सहस्रे एकहस्तं। शते
अरत्निः॥ शतार्द्धे मुष्टिमानं कुंडं कुर्यात्॥ ॥कामनापरत्वेन कुंडविधिः॥ ॥स्तंभने पूर्वमु
खमष्टदलं कुंडं कुर्यात्॥ मारणे आग्नेये त्रिकोणं॥ विद्वेषे दक्षिणे षट्दलं। वश्ये नै
र्ऋते वर्तुलं। शांतिके पश्चिमे चतुरस्रं। उच्चाटने वायव्ये सप्तदलं॥ लक्ष्मीकामे उत्तरे
पद्माकारं॥ शुभकार्ये ईशान्ये। आकर्षणे अर्द्धचंद्राकारं॥ मोहने द्वादशारं॥ योगनाशने
एकादशारं॥ राज्यप्राप्तौ पंचारं॥ सौभाग्यकामे चतुःपत्रं। संग्रामे धनुराकृतिः। निर्वै
रे द्विदलं॥ सर्वकार्ये चतुरस्रं॥ वर्णानुपूर्वेण कुंडानाह॥ चतुरस्रं ब्राह्मणस्य। वर्तुलं
क्षत्रियस्य॥ अर्द्धचंद्राकारं वैश्यस्य॥ अस्रं शूद्रस्य॥ सर्वेषां चतुरस्रं वा॥ ॥अथ स्थंडि

लविधिः॥ होमं त्वां मूमौ वालुकाभिरंगुष्ठपर्वोन्नतं चतुरस्रं होमानुसारप्रमाणं स्थंडिलं कु
र्यात्॥ समिद्धोमे स्थितः॥ आज्यहोमे आयानं॥ शेषेषु निषण्णं वह्निं ध्यायेत्॥ सधूमाग्निकर्म
तत्र कृतं चेत्॥ कर्तुर्व्याधिप्राप्तिः॥ ईषज्ज्वालानासिका तत्र कृतं चेन्मनसः पीडा॥ सधूमज्वा
लानेत्रं तत्र कृतं चेद्धनलं॥ केवलांगारामस्तकं तत्र कृतं चेद्धनक्षयः॥ धूमरहितप्रकृष्ट
ज्वालामुखं तत्र कृतं चेदभीष्टसिद्धिः॥ अयं विचारः आद्याकृतौ ततो यथावकाशं॥ गं
धपुष्पादिकमग्नेर्बहिर्दातव्यं॥ वामहस्तं स्वहृदि निधाय दक्षिणहस्तेन होतव्यं॥ तत्र
मुद्रास्तिस्रः॥ मृगी हंसी सूकरीति॥ संकुचितांगुली सूकरी॥ सा भिचारे प्रयोक्तव्या॥ कनि
ष्ठां मुक्त्वा संकुचितांगुलिचतुष्टया हंसी॥ सा पौष्टिके प्रयोक्तव्या केनिष्ठां तर्जनीं मुक्त्वा

पं०
५०

संकुचितांगुलित्रयामृगीमाशांतिकर्मणि प्रयोक्तव्या॥ स्वाहाकारेण सहैव स्वाहा ते वाइदं न ममेति त्यागो ते वाकुतिः प्रक्षेप्तव्या॥ ॥ अथाकुति द्रव्यमानं॥ ॥ घृतं कर्ष मात्रं॥ दुग्धमक्षमात्रं॥ मधुशुक्तिमात्रं॥ कर्पास्तिशुक्तयः प्रत्येकं टंकचतुष्कं नवनीतं दधि प्रसृतिमानं॥ लाजपृथुकसक्तुव्रीहिमुद्गमाषयवगोधूमाः मुष्टिमात्रं॥ व्रीहियवयोः शूतं शातं वा तंडुलास्तदर्द्धं तिलाश्चतुः षष्टिसंख्याः पर्वद्वयसंमृता वा॥ गुडशर्करा ः पलार्द्धं॥ चरुग्रासार्द्धं॥ कुंकुंटांड प्रमाणं ग्रासः॥ चंदनागुरुकस्तूरीकर्पूररोचनानि तिंतिणी बीजमानानि॥ न्यूपपत्रपुष्पफलान्येकैकं॥ इक्षुः पर्वमात्रं॥ मातुलिंगक दलीनां चत्वारो भागाः॥ पनसस्य दशमो भागः॥ नारिकेलस्याष्टमो भागः॥ बिल्व

५०

स्योरुवारुकस्यत्रेधाविभागः॥ कपित्थस्यद्वेधाविभागः॥ दूर्वानांत्रयं देशांगुलाः समि
धः चतुरंगुलाग दूर्वा॥ द्व्यंगुला लता॥ मूलकंदानामष्टमोभागः॥ लवणं शुक्तिमात्रं॥
एकविंशतिमरीचयः॥ क्षुरं रामठं बदरामानं॥ रामठं हिंगु॥ एवं ज्ञात्वा विशेषमन्यतो
याह्यं द्रवं स्रुवेण होतव्यं कठिनं पाणिना होतव्यं॥ यत्र द्रव्यनोक्तं उक्तमपि द्रव्यं न सं
भवति तत्राज्यतिला एव कल्पनीयाः॥ यवाधिक्ये आयुः क्षयः यवसाम्ये धनक्षयः
तिलाधिक्ये सर्वकामनासिद्धिः॥ अथ स्रुक्स्रुवलक्षणं॥ ॥श्रीपर्णी शिंशिपाक्षीरवृ
क्षेषु अन्यतमं हस्तमानं काष्ठं त्रिंशद्भागैर्विभज्य विंशत्यंशैर्दण्डमष्टांशैर्वेदीति निर्णयः
॥ अत्रानुक्तमपेक्षितमन्यग्रंथांतरतोवगंतव्यमिति दिक्॥॥ इति सिद्धेश्वरकृतायां
पञ्चांगहरमुक्तावलीसमाप्ता सं० १८८९ वैशाख कृष्णे

पं.लि. ५२

बीजा ग्रंथथी लखुंछे

1 चंदन
2 अगर
3 तमालपत्र
4 कपूर
5 मोथो
6 केसर
7 वाला
8 कुठ

बीजी पोथी

1 चंदन
2 अगर
3 कपुर
4 पद्मक
केसर
कस्तुरी
रक्तचंदन
कुठ

शंभूलालने वगोतनो प्रयोग आप्यो.

धर्मसक्त
पूज
८१५

५२